No. २० ग-२ E. 75

Title कात्यायन सूत्रव्याख्या (१मोऽध्यायः)

Author

Extent ६४ पत्र Age १९२२

Subject सूत्र

र. नं० १०

॥अथकात्यायनसूत्रव्याख्याप्रथमाध्यायः॥

॥खंडिकाप्रारम्भः॥

नं० ४५५०

नं. १०११२
कात्यायनसूत्रव्या(०)
प्रथमाऽध्याय
६४ पत्राणि
सम्पूर्ण
सं. १९८२
वि.

ॐ महाश्रीगणपतयेनमः ॥ वि — — बरायनमः ॥ अथपद्दाद्वौमंगलार्थ
मानंतपार्थिष्व परिभाषाध्यायस्यभाष्यानुसारितं लिख्यते ॥ किंचित्पू
१ र्वपक्षः अवांतरःपक्षः ॥ सर्वःसिद्धांतपक्षो लिख्यते ॥ अथवेदाध्य
यनानंतरं ॥ अतःपतःकारणाद्वेदोधीतः अतोहेतोः अधिकारोवक्ष्य
ते कर्मजन्यफलभोक्तृत्वं अधिकारः नवकर्मणांफलवत्वेसिद्धेसति
सिध्यति नान्यथा नकस्यापिकर्मजन्यफलभोक्तृत्वापरपर्यायो
ऽधिकारःसिध्यतीतिप्राप्तेआह ॥ फलयुक्तानिकर्माणि ॥ फलं
प्रत्यक्षाभीष्टंस्वर्गधनपुत्रादिकं ॥ वेदोक्तानिकर्माणिफलस्यसाध
कानिभवंति ततःकर्मणांफलवत्वेकर्मजन्यफलभोक्तृत्वापरप
र्यायोधिकारोपिप्रकृतस्याग्निहोत्रादिकर्मणःसिध्यति सर्वेषां

नित्यपेक्षोद्वायामाह सर्वेषामविशेषात् सर्वेषांकर्मजन्य
नसमर्थानामसमर्थानांवांधमूकपंगुवधिरदेवऋषिति
रश्चांवकर्मस्वाधिकारोभवति अविशेषात् फलार्थित्वस्य कृतः
सर्वेषामविशिष्टत्वात् फलंहि सर्वैरिष्यतएव ॥ इतिपूर्वःप
क्षः ॥ अवांतरःपक्षमाह मनुष्याणामारंभसामर्थ्यात् वा
पाठः पक्षव्यावृत्तौ न सर्वेषामधिकारः किंतमनुष्याणामेव
कुतः आरंभसामर्थ्यात् मनुष्याएवहियस्मात् मंडनः दर्शे
ष्टिपौर्णमासेष्टिसोमेज्याग्निसंग्रहं अग्निहोत्रंविवाहंत्वाग्रयो
गेष्टमेरिपत्त रनकूपपञ्जिनवेद्यंपेषेसोदर भूतंकर्मारब्धुंकर्तुं
समापयितुंसमर्थाः नदेवऋषितिर्यगादयः तत्रदेवानांतरामा द

—— १ —— अ॰ हीति ज्येष्ठभ्रात्रा विहीनेऽसति आधेयं तदनुज्ञया पितुः सत्यपि अनुज्ञानेनादधीत कदाचन ॥

का॰ प॰ सू॰ व्याख्या २ नधिकारः ऋषीणां चार्षेयाभावादनधिकारः तिरश्चां कर्मकर्तृत्वाभा श्र॰ ध्या॰ वं॰ १
वाच्च एवं सर्वेषामपि मनुष्याणामधिकारे प्राप्तेऽह अङ्गहीनाश्रो
त्रियषण्ढशूद्रवर्जम् एतान्वर्जयित्वा मनुष्याणामेवाधिकारः मनुष्या
अपि अङ्गेन चक्षुरादिना हीनास्ते कर्मकर्तृत्वे न प्रभवन्ति अन्धः आज्या
वेक्षणं कर्तुं न प्राप्नोति मूकश्च मन्त्रोच्चारणं पङ्गुश्च विष्णुक्रमणं व
धिरश्चाध्रेयश्रवणं अनधीतोऽश्रोत्रियश्च किमपि मन्त्रसाध्यं
कर्म कर्तुं न प्राप्नोति षण्ढश्चानधीतवेदत्वाद् द्रव्यत्वाद् [illegible]
नधिकारः शूद्रस्यानधीतवेदत्वादनधिकारः समर्थस्य सतः शूद्र-
स्य कुतो नाधिकारो भवति वेदे चैवं विधानि लिङ्गान्यपि सन्ति शू
द्रस्याधिकारः दृश्यते आधवेति शूद्रस्येति हविष्कृदाह्वाने उप

आधीवद्दशः शूद्रस्याग्निपितृमेधे ननु अनधीतवेदत्वात्षण्ढस्याधि
कार इत्युच्यते अनुपनीतस्याप्यनधीतवेदस्यापि शूद्रः पत्नीवदु
विष्यति एवं प्राप्तेऽह ब्राह्मणराजन्यवैश्यानां श्रुतेः शूद्रस्य कु
तो नाधिकारः अनुपनीतत्वात् अनध्ययनत्वादग्न्याधानश्रवणा
भावाच्च शूद्रस्यानाधिकारसिद्धं ननु कस्मान्नोपनयनं अनुपनीतो वि
क्ष्यति नैवं शूद्रस्य वेदाक्षरश्रवणे उच्चारणे धारणे च प्रायश्चित्त
स्य दर्शनात् श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणं उच्चारणे जिह्वाछेदः
धारणे च शरीरभेद इति तथा यद्यु वा एतत् श्मशानं यच्छूद्र
स्तस्माच्छूद्रसमीपे नाध्येयमिति अनुक्ता आधवेति शूद्रस्येत्यादीनां
लिङ्गानां का गतिः उच्यते रथकारविषयाणि तानि रथका

रस्यहि सर्वकर्मस्वधिकारं वक्ष्यति रथकारस्याधाने इति सवर्णस्त्रासं
वंधात् शूद्रः कथ्यते तस्य मातामही शूद्रेति ब्राह्मणो यजेत स्वर्गका
मो यजेत एवमादिषु इदं संदिह्यते पुल्लिंगनिर्देशात् किं पुरुषस्यैवाधि
कारः इति अत्र ब्रूते आह स्त्रीचाविशेषात् स्त्रीच अग्निहोत्रादिकर्मस्वा
धिकारिणी भवति कुतः अविशेषात् यतः स्वर्गकामो वा सर्व इ
त्येतत् पुल्लिंगं श्रूयमाणमपि नाविशेषकं तेन विधिसंस्पर्शाभावाद
विवक्षितं अतो न पुरुषस्यैवाधिकारः किंतु स्त्रियाश्चाप्यधिकारः
पितृभ्रातृभर्त्रादिदत्तसंभवाच्च पत्न्यार्जितस्योभयसाधारणत्वाच्च
धर्मे चार्थे कामे नातिचरितव्या पाणिग्रहणाद्धि सहत्वं कर्मसु दर्श
नाच्च इष्यते चायमर्थो वेदे अथ वेदं पत्नी विसृंसयति तथाच

स्मृतिः नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणं शुश्रूषयति भ
र्तारं तेन स्वर्गे लोके महीयते अत्रापि तत्रापि यजमान एव कर्ता विद्यत्वा
त्स्वतंत्रत्वाच्च अतः सर्वं समंत्रकममंत्रकं च याजमानं यजमानेनैव कर्त
व्यं आहुत्यविहितं ताद्रूप्यवेदनादि पत्न्या कर्तव्यं नान्यत् तदेवम
गहीनादिवर्जितानां ब्राह्मणराजन्य वैश्यानां पत्नीसहितानामग्नि
होत्रादिकर्मस्वधिकार उक्तः रथकारस्याधाने रथकारस्या
धानेऽधिकारो भवति वर्णांतर रथकारः आदधीतेति श्रुतेः र
थकारः त्रैवर्णिकजात्यंतर एव आधानमात्रेऽधिकार इति अत्र ब्रूते आह
नियतं च तस्य रथकारस्यानियतं नित्यं कर्माग्निहोत्रादिदर्शपूर्ण
मासादिकं भवति चकारात् काम्यं नैमित्तिकं च एवं प्राप्ते आह ना

का·य·सू·
आख्या
४

प्र·ध्या·खं·
१

भावादिति वाच्यः रथकारस्य सर्वकर्मस्वधिकारो भवतीति यदुक्तं तं
न कुतः अभावात् रथकारस्य कर्मसु लिंगानि न संति त्रैवर्णिका
नां तु आधानं कृतं कर्मसु लिंगानि संति कानि पुनस्तानि लिंगानि
ये रथकारस्याधिकर्मसु अधिकारो वसीयते उच्यते आधानं वेति
ब्राह्मणस्य कृष्णीवद्ध ... ब्राह्मसंबंधब्रूयकारः
स त्र्यब्दुदाद्वेनाभिधीयते तत्र तस्य नाताम ही वृद्धेति विषयाणि
ति वैश्यायां शूद्रायां राजन्यात् माहिष्योग्रौ प्रजातौ स्मृतौ वैश्यात्तु क
रणः शूद्रायां विन्नास्वेषविधिः स्मृतः विन्नासु परिणीतासु रथका
रस्याधानमात्रेऽधिकारपक्षे एतानि लिंगानि निर्विषयाण्येव
स्युः तस्माद्रथकारस्योत्तरकर्मस्वप्यधिकार इति सिद्धं तथा चो

करणं

क्तं याज्ञवल्क्यस्मृतिविवृत्तौ मिताक्षरायां विन्नास्वेषरा क्षत्रियेण
वैश्यायां माहिष्यादितो माहिष्यः वैश्यायां शूद्रायामुत्पादितः कर
णी तस्यां माहिष्येणोत्पादितो रथकारो नाम जातिर्भवति त
स्य चोपनयनादि सर्वकार्यं वचनात् यथाह शंखः क्षत्रियवै
श्यानुलोमांतरोत्पन्नो रथकारस्तस्याध्ययनेज्यादानोपनयनं संस्क
रक्रिया श्वाधानं विप्रारण्यक्तं वृत्तिर्वास्तुविद्याऽध्ययनवृत्तिश्चेतिसिद्धं ता
निषादस्थपतिर्गावेधुकेऽधिकृतः निषादस्थपतिर्गावेधुके चराव
धिकृतोऽधिकारी भवति निषादस्थपतिः क्षत्राधिकारी श्रुति
बलादननिमानग्नेर्पातीतिसिद्धं यावकीर्णिनो गर्दभेज्या यो
ब्रह्मचारी सन्नस्त्रियं गच्छति सः अवकीर्णं तस्यावकीर्णिनः प्रा

यक्षितार्थगार्दभेज्यायागोभवति वा विकल्पः तेनगृह्योक्तमधिश्रा
यश्चितांतरं श्राज्याहुतिद्वयरूपं विकल्पेन भवति कामावकीर्णोस्मीत्
त्यादिकं श्रत एव तदर्थमेवाधानेनाहवनीयादावनुत्पाद्यत एवेत्
त्रुभयंकर्तव्यमिति प्राप्ते श्राह लौकिके एतौ स्तूयतीष्टि रवकीर्णिप
शुर्लौकिकेग्नौ भवतः नहीमाविष्टिपशू श्राधानं प्रयोजयतः शूसो
पक्षपुरोडाशाश्चपणं नतु कपालेषु श्रत्ववदानहोमः श्रवदा
नग्रहणादन्यदा धारावाज्यभागहोमादिकं स्मावेदकार्थं श्री
श्रान्वाधानावदान गर्दभपाशाख्यात् नतोहवेभ्यो हृदयादिभ्य
श्रवदानस्तावदाहवनीयाद्यग्निषु किंकिंक र्त्तव्यमि
त्यपेक्षायामाह वैतानिकेषु सर्वं सर्वार्थत्वात् वैतानिका

वितानाहि विहारयोग्या गार्हपत्यादयः तेषु वैतानिकेषु श्रग्नि
षु सर्वकर्म श्रौतं हविः श्रपणहोमादिकं स्मार्तं वपहोमादिकं नित्य
पाकप्रकारादिकं भवति कुतः सामर्थ्यात् समर्थाहि गार्हप
त्यादयः तेनाश्रौतं स्मार्तं च नित्यपाकादिकं वैतानिकेषु
भवति दर्शनाच्च दृश्यते चायमर्थो वेदे दक्षिणाग्निं प्रकृत्य
श्रूयते पाकादिकं मांसं तत्र न पचेयुरिति अत एव श्रातिथ्येऽप्यग्ना
विन्द्रयीयते मांसपाकोश्वामित्रेष्टौ विहितः स्मार्तमपि वैता
निकेषु कर्तव्यमिति पूर्वपक्षः सिद्धांतमाह नौपासनश्रुते प
उक्तं वैतानिकेषु श्रौतं स्मार्तं च कर्तव्यमिति तन्न कुतः यतः
श्राहिताग्नेरपि श्रौपासनः श्रूयते पितृमेधे तत्र श्रग्नौ धारेण

का॰प॰सू॰ व्याख्या॰

-पारवादि र गृह्यसूत्रे होमार्थात्रूश्यत्नात्पर्यवत्सपर्यात्कृत्स्न औपासनेनस पर
र्वानैकदेशगो सर्वातेलौकिकोभवेत्

औपासनं निरस्यतीति तथाचस्मृतिः कर्मस्मार्तं विवाहाग्नौ कुर्वीत
प्रत्यहं गृही दायकालाहृतेवापि श्रौतं वैतानिकोग्निति गृहापहितं
गृह्यं गृहशब्दश्च दंपत्योर्वर्तते तास्मिन्नाधसंपाद्यो भवतीति अ
तएवाह कात्यायनः वस्वेवाग्नौ अन्यहोमः स्यात् लुच्वैकांसमिद
कृतिं स्वगर्भसत्क्रियार्थं ध्वियावन्नो सौवप्रजापते तस्मात्स्मार्ता
नि औपासनेत्वेवकार्याणि यद्येवं तर्हि मांसपाकप्रतिषेधस्यका
गतिरित्यतआह आधिश्रयणीये अ ऽस प्रतिषेधः यदेव उक्तो मं
सपाकप्रतिषेधो मांसं तत्र न पचेयुरिति सोऽधिश्रयणीये ऽहनि ज्ञे
यः नवगृहे यदावासः क्रियते तदा तस्मिन्नेवाहनि तत्र दाक्षिणा
ग्नेराहरणं कार्यं नाहवनीयं रिति तदावत तस्मिन्नगृहाकृते दक्षि
वत्स्रति होमविति विकल्पं वक्ष्यति नवावासितेवेनमौरेयुः पं॰ १॰

प्र॰ध्या॰खं॰ १

णाग्नौ अविशेषेण भोजनार्हस्यअनियतद्रव्यस्य पाको विहितो
ऽति तास्मिन्यावयुक्तद्वाहरणा अश्नीयुरिति तत्रकदाचित् मांस
संपन्नो तस्यापि पाकस्तत्र प्राप्नोति तस्यैव प्रतिषेधो मांसं तत्र न
पचेयुरिति अनेन नवगृहवाससंबंधि आह : सदेव अधिश्रय
णीयमहः दाक्षिणाग्न्याहरणादिनं सद्यते ऽतः श्रौतान्येव
वैतानिकेषु गार्हपत्यादिषु कर्तव्यानि स्मार्तानि आवसथ्ये ग्ना
वेवेति सिद्धं यत्तुस्मृतौ दाक्षिणाग्नावग्नौ करणहोमोऽक्तः स
सर्वाधानपक्षे ऽर्धाधानपक्षे वा वसथ्ये ग्नावेति १ यज्ञं व्याख्या
स्यामः तमेवाह द्रव्यं देवतात्यागः द्रव्यं पुरोडाशचरुसांनाय्य
पयसोमादिकं देवता अग्निसोमेंद्राविष्ण्वादिशब्दमयी तथाचो क्तं

तद्भिन्ने न चतुर्थ्या वा मंत्रवर्णेन वेष्यते देवतासंगतिस्तत्र दुर्बलं तु
परंपरं तत्र तद्भिन्नेन देवतासंगतिर्यथा आग्नेयोष्टाकपालः चतु
र्थ्या देवतासंगतिः यथा अग्नये नीकवते ष्टाकपालं मंत्रवर्णेन
देवतासंगतिर्यथा उत्तराघारे देवतोद्देशेन द्रव्यत्यागो यागः स एव
प्रक्षेपाधिको होमः तदंगत्वं तु समभिव्याहार प्रकरणाभ्यां प्र
धानभूताद्यागादन्यद्यदुच्चारणमन्वाधान ब्रह्मवरण व्रतग्रह
णादिकं तत्सर्वं तदंगं प्रधानयागस्य उपकारकं भवति संनि
१धि ति योग्यता सति [illegible] मतां अभीप्याकांक्षावतां पदानां व्याहारोच्चा
रणं समभिव्याहारो वाक्यं तस्माद्वाक्यात्प्रकरणं बलवदित्यर्थः त
त्र वाक्यस्य तावदुदाहरणं पौर्णमास्यां इन्द्राय विमृधे [illegible] निर्वपति

प्रकरणपाठाद्वैधस्योभयांगत्वे प्राप्ते वाक्यात्पौर्णमासांगता भव
ति अतः पदद्वयं समभिव्याहारादेव कल्प्यते प्रकरणं चोभयाकां
क्षा तथाहि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्येतस्यामाकां
क्षायां अविच्छिन्नायां यान्यकृत प्रयोजनानि अन्वाधानादीनि ग्रह
णपरिगृहीतानि कर्माणि पठ्यन्ते दर्शपूर्णमासयोश्च उपकारापेक्षाव
र्तते अन्वाधानादीनां कार्यापेक्षा वर्तते एवमुभयोः आकांक्ष
त्वे सति तत्संबंधप्रतिपादकवाक्यं कल्प्यते अन्वाधानादि
भिः कृत्वेतेन यागेनेष्टं कर्त्तव्यमिति एवं ततो वाक्याल्लिंगं अन्वा
धानादिगतं सामर्थ्यं कल्प्यते लिंगाच्च विनियोजिका श्रुतिः कल्प्य
ते एभिः आग्नेय प्रधानस्योपकारः कार्यः देवतोद्देशपूर्वकं द्रव्य

त्यागात्मकानां प्रयाजादियागानां स्रुवाघारादिहोमानां चानेनांगत्वं न सिद्ध
मीत्यत आह यजतयश्चाफलयुक्तास्तच्चांगं अफलयुक्ताः यजतयः प्रयाजा
दियागाः चकारात्स्रुवाघारादिजुहोतयश्च तदंगं तस्य फलवतो यागस्य
प्रधानस्यांगं उपकारकाः भवंति नात्र यागमात्रस्य फलसंबंधः उ
च्यते किं तर्हि ये यागा दर्शपूर्णमाससंज्ञास्तेषामेव फलं तद्यथाग्नेयो आग्ने:
ष्टाकपालः पौर्णमास्याममावास्यायां चाच्युतो भवतीत्याग्नेयस्य
दर्शपूर्णमाससंयोगेनोत्पत्तिः तथाग्नीषोमीयं पौर्णमासे प्रावच्छ्
त् तथा ऐंद्रं दधि अमावास्यायामैंद्रं पयः ऐंद्राग्नो द्वादशकपालः एते हवी
र्षी संबंधस्य दर्शपूर्णमासपदेन लक्ष्यते तेषामेव च संबंधः अनेन यागे पस:
न दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत अत एते फलवंतः प्रधानभूता

इतरे प्रयाजादयो निःफलाः यजतिजुहोतीनां को विशेषः यजती
नां यागानां जुहोतीनां होमानां परस्परं को विशेषः तिष्ठद्धोमा वष
दा ट्कारप्र नायाज्यापुरोनुवाक्यावंतो यजतयः "उपविष्टेन कर्त्रा होमा ये जुहुते उप
विष्टहोमाः स्वाहाकारेण प्रदानं ये जुहुते स्वाहाकारप्रदानाः यो ये जुहुते तिष्ठताहो
तिष्ठद्धोमाः वषट्कारेण प्रदानं ये जुहुते वषट्कारप्रदानाः याज्यापुरोनु
वाक्याविधये ये जुहुते उं ति ये स उपविष्टहोमाः स्वाहाकारप्रदानाज्जुहो
तय इत्युच्यते पूर्वमन्वाधानादंगानां प्रयाजादीनां चांगत्वमुक्तं
तानि चांगानि ऋत्विजं कुर्वीत दर्शपूर्णमासाग्निष्टोमादिषु किं त्रयो
विंशतिः ऋत्विजो भवंति उत ब्राह्मण एवेति ब्राह्मण ऋत्विजो भक्षप्रतिषे
धादितरयोः अग्निहोत्रप्रोषितप्रवृत्त्यभक्षवते नेहोद्युः कोन इदं हो

का॰ य॰ सू॰ व्याख्या ६

1

प्र॰ ध्या॰ खं॰ १

आतीति तद्धैनाद्ब्राह्मणः पिबेत् आरब्धान्तरेन राजन्यो न वैश्यो वा तांश्च
यं पिबेद सोमपीथो हि सः सोमस्थाने हुतीभवति दर्शनाच्च श्रुतावपि
ऽयमर्थो दृश्यते ब्राह्मणेष्वेव ऋत्विजः तथा हि द्वया वै देवा देवाः स्व
र्गकामस्य तपेव इत्येवमादीनां फलयुक्तानां कर्मणामारंभे किं कर्त्तुः
याथाकाम्यं उत अवश्यं तेषां करणं फलयुक्तानामारंभे याथाकामी
फलार्थित्वात् काम्यानां कर्मणां वाद दशाहादीनां आरंभे करणे कर्त्तु
र्याथाकामी स्यात् इच्छया प्रवृत्तिः स्यात् कुतः फलार्थित्वात्
फलमपर्ययते याथातोऽस्ति फलार्थी फलार्थिनः फलं विधीयते
नान्यस्य एवं सर्वकर्मसु इच्छयानुष्ठानप्राप्तेराह नाविय
मनिमित्ताग्निहोत्रदर्शादृष्टिमासदाग्रयणाग्रयणपशुप्रवृत्तेः

नियमः सत्यं वदेत् निमित्तं कर्मविशेषादि नौ अग्निहोत्रं प्रातर्होमः
दर्शपूर्णमासो प्रकृतीष्टी दाक्षायणो विदर्शपूर्णमासविशेष
एव आग्रयणं नवयज्ञः पशुर्निरूढः एषु नियमादिष्वप्रकृते
ष्वन्यत्रोक्तेषु कर्त्तुर्न याथाकामी न याथाकाम्यं कुतः प्रवृत्ते आरंभात्=
शास्त्रं ह्येतेषु नियमेन पुरुषं प्रवर्त्तयति अतएषां नियोगतो
ऽनुष्ठानं कर्तव्यं तथा हि सत्यं वदेत् निषेधः श्रूतेश्च निमित्ते सति
नैमित्तं गृहदाहे अग्नये क्षामवते इष्टिः अग्निहोत्रेऽपि न याथाका
म्यं यावज्जीवमग्निहोत्रं जुहुयात् यावज्जीवं दर्शपूर्णमासा
भ्यां यजेत आग्रयणेऽपि न॰ द्यावापृथिव्योस्स्यात् [illegible] स्यो स्यदेवे
हेमन्तान्तरं शरदनंतरं विधीयते पशावपि न॰ तं वे [illegible]
तैवसीसेनानी

ज्ञानमतीयादिति षड् षड् पशुबंधयाजी अत एवाह वसिष्ठः अवश्यं
ब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाग्रयणेष्टि चातुर्मास्य पशुसोमैश्च
यजेत पाकहारितोऽपि पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः
सोमांश्च विधिवत्सर्वैर्यदीच्छेद्धर्ममव्ययं ते च गौतमेन दर्शिताः अ
ष्टका 'पार्वणं' श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त
पाकसंस्थाः अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्या
ग्रयणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः
अग्निष्टोमोऽत्यग्निष्टोम उक्थ्याः षोडशी वाजपेयोऽतिरात्रो
ऽप्तोर्याम इति सप्त सोमसंस्थाः पार्वणं पर्वणि क्रियमाणं स्था
लीपाकलक्षणं श्राद्धं मासिमासि श्राद्धं आग्नेहविं च यज्ञया

दायं ते श्रुतिस्मृतिः सदा दर्शेन चार्धमासांते पूर्णमासांते वचैवहि
मस्यांते नवसस्येष्ट्या तथात्वंते द्विजोऽध्वरेः पशुना त्वयनस्यां
ते सौम्यैकैर्मखैः आयंते श्रुतिस्मृताः सायंप्रातरित्यपूर्वः अध्या
रे माताऽस्यैः सौमेऽथैके अग्निष्टोमेनयाप्याकाम्यं वसंते व
संते ज्योतिष्टोमेन यजेत एवं चातुर्मास्यादौ ज्ञेयं अतः प्रयो
गभेदश्च अग्निहोत्रादिवत् एकः स्वर्गकामप्रयोगः अपर
स्तु नित्यः अत एव गवामयने वारणात्तरेण सोमांतराय अ
तामुच्यते कथमेषां सोमानंतरितो भवतीति सवानेरितिश्रुया
त यदि सोमस्याऽवश्यकर्तव्यता न स्यात्तर्हि कारणांतरेणाऽन
तराय वचनं न स्यात् मनुः यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्त
ये अधिकं वापि विद्येत स सोमं पातुमर्हति एतत्काम्यसोमयाग

का·य·सू·
व्याख्या
११

विषयं शंखः त्रैवार्षिकाधिकान्नः सपिवेत्सोममत्र द्विजः इष्टिं वैश्वा प्र·ध्या·खं·
नरीं कुर्यात्तथैवाल्पधनो द्विजः मनुः पुराणानन्यानि कुर्वीत श्र
द्दधानो जितेन्द्रियः नत्वल्पदक्षिणैर्यज्ञैर्यजेत ह कथंचन इन्द्रियाणि यशः
स्वर्गमायुः कीर्तिं प्रजाः पशून् हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो
यजेत् मत्स्यः अन्नहीनो भवेद्राष्ट्रं · अन्नपरिमाणमपि शंखेनोक्तं
सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ चातुर्मास्येषु सर्वेषु शतं
पर्वणि पर्वणि वै ब्राह्मणः यस्यानित्यानि लुप्तानि तथैवागन्तुका
नि च विपद्यो हि न स्वर्गं न गच्छेत्सततिन्नो हिंसः तस्मात्कदेः कालेषु
लैर्मधुनापयसापिवा नित्यं नित्यानि कुर्वीत न चानित्यानि लो
पयेत् तेनाल्पधनस्यापि क्त्वाध्मते सोमेचाधिकारः कूर्मपु
राणे नास्तिक्यादथवालस्याद्योऽग्नीन्नाधातुमिच्छति यजे

त वा न यज्ञेन स याति नरकान् बहून् याज्ञवल्क्योऽपि प्रतिसंव
त्सरं सोमः पशुः प्रत्ययनं तथा कर्तव्या आग्रयणेष्टिश्चातु
र्मास्यानि चैव हि एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विज इति
चातुर्मास्येषु चतुर्मुखः स्मृतेः चातुर्मास्येषु चतुर्णां पाक
मी कृतः स तत्रयं स्वत्व ... चातुर्मास्ययज्ञोत्तीर्णासा पुव
एगात् सत्तोऽस्वं प्रयच्छादिनं प्रतिपत्तत्वेत्यर्थः अत एवाहि
ध्यदेव वतस्य प्रघासादीनि चातुर्मास्यपर्वाणि प्रातिपच्चेव
त्रि यंत्रेन पौर्णमास्यां तथा चप्रयुज्यते एषाह संवत्सरस्य
प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी यो जनरोति नियतस्सहा
पात्रात् नियत्रोनितैः राग्निहोत्रादिकर्मभिः सहपात्रादपि चा

का॰प॰स॰ व्याख्या १२ तुर्मास्यान्यापि तद्वदवश्यं कर्तव्यानीति सुव्याख्याकाम्यं तथाहि नरता प्र॰ध्या॰खं॰ १
त्परकृतं स्मेति इति होत्रं दर्शनाच्च गृहमेधे उपायं तरे कृतौ चातुर्मास्यानं
कानंतरायदर्शनाच्च चातुर्मास्येनयाप्याकाम्यं तथाहि कथमेषां चातु
र्मास्यानां नैरंतरितानि भवंतीति पयस्ययोर्लिङ्गयात् सिद्धांतसूत्रा
दपर्द्वेषमाह नोत्सर्गयोगात् चातुर्मास्येष्वनयाप्याकाम्यमितीयत्सु
त्रांतेन उत्सर्गयोगात् पतश्चातुर्मास्यादा मुत्सर्गयोगोस्ति इति
नैतस्य गमनस्य इत्येवं पूर्वपक्षिते उक्तमेव सिद्धांतं दृढयति स्या
त्रिंशद्वत् चातुर्मास्यानां नित्यत्वेपि उत्सर्गस्यात् भवेत् किंवत्
त्रिंशद्वत् यथा दर्शपूर्णमासयो त्रिंशद्वर्षानंतरमुत्सर्गः
तस्माद्वा ंशतमेववर्षाणि यजेत एवमपि वचनादुत्सर्गयोगो
त्रि

14

वि वैकल्पिको भविष्यति नित्यत्वं च विगुणेफलनिवृत्तिरंगप्रधानभे
दात्तानित्ये कर्मणि क्रियमाणे होत्रदर्शपूर्णमासादिके विगुणे पि रंगहीनेपि
पि कृते फलनिर्वृत्तिः प्रत्यवायपरिहाररूपस्य फलनिष्पत्तिर्भविष्यत्ये
व कुतः अंगप्रधानभेदात् यतोंगानि प्रधानानि चभिन्नानि प्राय नि=
श्चित्तविधानाच्च प्रायश्चित्तविधानादप्येवं ज्ञायते तत् विगुणेपि
फलनिर्वृत्तिर्भवतीति यदि च विगुणात्फलं न स्यात् तर्हि प्रायश्चित्त
नाविदधीत तथाच दृष्टं नित्यं कर्म यथाकथंचित् कृतं गावरि
त्यागेनापि यथा शक्त्यं गोपेतं कृतं सुष्ठातत्फलेन कृतौ दृष्टं यत्पयो
न स्पर्शकिनद्यायाहुतिर्व्रीहियवाभ्यामित्यादि श्रांखवांतराच्च तस्माद्वि
गुणेपि नित्ये प्रत्यवायपरिहाररूपं फलं भवत्येव अथ काम्ये कर्म

का.प्र.सू. व्याख्या १२

13

प्र.धा.खं. १

मीरीषिविचिंत्यते काम्येपिविगुणेफलंनिष्पत्तिर्भवत्येव यत्तत्तत्राविक्लंग
तिप्रधानातिमिन्नानि अश्वमेधेचकाम्येप्रायश्चित्तविधानमपिक्र
त्ती अपातःप्रायश्चित्तीतांयद्यश्वोवडवाङ्ः स्याद्देवा[illegible]व्यंपयोनु
नीवपेत् यदिचविगुणादपिकाम्यात्फलंनस्यात्तर्हिप्रायश्चित्तवि
धानंव्यर्थमेवस्यात् तथाचदृष्टं विगुणमपिकाम्यंफलोत्पाद
कंवेदेदृष्टं कारीरीमिष्टिंप्रकृत्यश्रूयते यदिवर्षेत्तावत्येवजुहुया
त् अत्रासमाप्तायामेवकारीर्यांतत्फलंवृष्टिस्वरूपंवेदेदृष्टं इ
तिहृदयाद्वितेसिद्धान्तमाह नप्रकृतिलक्षणत्वात् यदुक्तंविगुणे
पिकाम्येफलंनिष्पत्तीतितन्न कृतःप्रकृतिलक्षणत्वात् काम्यस्य

यतःकाम्यंसगुणमेवसर्वाङ्गोपेतमेवप्रकृत्याल्पादितंफलसा
धनत्वेनविहितं तत्रांगलोपेकाम्यमानफलानुपपत्तेः तत्र
प्रधानस्यत्यागेयथाफलंनास्ति एवमंगत्यागेपि फलसाधन
त्वंहिशास्त्रैकसमधिगम्य तत्तोयदंगप्रधानंवायावच्छब्दो
पात्तं तस्यलोपेसाधनत्वंनास्ति अतोयदासर्वांगोपेतक
र्तुंनशक्नोति तदेवतत्रप्रवर्तते प्रायश्चित्तंतत्काले आ
रब्धंहिकाम्यंअवश्याकरणादिनाविगुणमपिअसमाप्यतेवि
धिर्दृष्टविगर्हणात्पाकिंचाचारात्स्मृतिस्मृतेश्चप्रकृतिकल्प
यित्वाअवश्यंसमापनीयामवाविगुणाच्चयद्यपिप्रकृतंफलं
नभवति तथापितादृशाम्रपत्यवायपरिहारोभवत्येव विगु

का.य.स
व्याख्या
१४

प्र.ध्या.खं.
१

14

शायामादिकृत्स्नसमाप्तायां कारीर्यादिष्टिरूपफलदर्शनस्य का गतिः —
पाकांक्षायामाह दृष्टे तत्परिमाणं कृताप्तायामिष्टौ वर्षणे दृष्टे सति त
त्परिमाणमेव कर्तव्यं कर्म यत्परिमाणमदृष्टे वर्षणे क्रियते न तु व
ष्टौ दृष्टायां किमपि कुर्वन्तं कृत्वा हृद्यापरित्याज्यमिति अध्वना लिंगेन मंत्र
णां विनियोगं वक्तुकामोऽध्येतृप्रसिद्धांस्तान्मंत्रानाह ऋचो यजूं
षि सामानि निगदा मंत्राः यत्र नियताक्षराणि नियताश्च
पदाः नियतानि चावसानानि ता ऋग् इत्युच्यते अनियताक्षर
पादावसानं यजुः गीतिमंत्रवाक्यं साम गीतिरेव साम नि
गदाः प्रैषाः परसंबोधनार्थाः प्रोक्षणीरासादयाग्नीदग्नी
न्विहरेत्येवमादयः निगदा अपि यजूंष्येव उपांशुयजुषां कि

यते उच्चैर्निगदेनेति लक्षणमनयोरपि काचिदुपांशुप्रयोगविधा
नात् यजुषां च प्रैषेषु पठितत्वात् लक्षणं विना भेदो न ज्ञायते इत्य
त आह तेषां चाकांक्षा निराकांक्षं गतावत्सर्वेषां प्रातिस्वतो नावि
नियोगोऽस्ति नच पदादिनापूर्वीत इत्येतल्लक्षणं वेदवचनं
न्यायेन स्वकृता इदं उक्तं अत्रोलक्षणमुच्यते तेषां यजुषां
प्रैषेषु पठितानां मध्ये यावत्पदवृंदं निराकांक्षं पूर्वापर
पठितपदान्तराकांक्षा रहितं तावत्पदसमूहात्मकं एकं वा तं ×
क्यं इदंप्रोक्तं एकं यजुः तेनैतावद् समूहे न प्रयोगसाधनं तापः=
स्मार्यते तावद्यजुर्वाक्यं तच्चैका पंक्तिसाकांक्षावपवच ।
यथा देवस्य त्वा सवितुः प्रसवे इति अत्र सर्वाणि पदानि
परस्परसाकांक्षाण्येकत्र एकानि साकांक्षाणि च तस्मा

दोयामेकं यजुरुक्तं एवं सर्वत्र पुरस्तात्परस्ताच्चैकार्थपदपरि
ग्रहेणासमर्थपदविमोकेन मिश्राणि यजूंषि कल्प्यन्ते मिथ
संबद्धं यावदेवामिथःसंबद्धं परस्परसंबद्धं अन्वययुक्तं मि
थोऽन्ये त्यैतावत्तावदेकं यजुः एकं वाक्यं पूर्वमंत्रपरमंत्रे
वा पठितो वाक्यशेषः मंत्रान्तरेणापि संबध्यते स एव अनुषं
गः तद्यथा अस्मादन्नादस्यै प्रतिष्ठायै इत्यादौ पूर्वमंत्रा
नन्तरपठितः निर्भक्तो योऽस्मा[n]द्वेष्टीत्यादि वाक्यशेषः स एवा
नुषंगः अध्याहारो लौकिकः अनुषंगस्तु वैदिकः प्रयो
जनं एतावच्चिन्तायाः अध्याहारविनाशोऽस्मान्नं प्रायश्चित्तं
अनुषंगाविनाशोऽध्येतव्यमिति दर्शपूर्णमासयोरिषेत्वे

त्वाऽश्विनश्रीत्यध्याहारः ऊर्जे त्वेत्यत्र रसं तेनमयामीति
ऽध्याहारः तेषामारभ्यतो व्यवस्थानं तद्वचनत्वात् तेषां
मंत्राणां आरंभे प्रयोगे अर्थः विहितार्थाभिधानरूपे
णासामर्थ्यं तालिंगेन ज्ञानेन मंत्रेणाध्यं पदार्थः कर्तव्य
अनेनापरत्वैवं रूपा व्यवस्था भवति यो मंत्रो [illegible] यदा
र्थाभिधानसमर्थः स तत्र द्वाविनियुज्यते तु स्मार्थः कृता
त्तद्वचनत्वात् तमेवार्थं वक्तीति तद्वचनः नानार्थंतरं
यथा ऊरुप्रथा ऊरुप्रथस्वेति मंत्रभवं प्रथनमेवाभिधत्ते
सामर्थ्यं मंत्रांतः कर्मादिः सन्निवेशो विधानात् अ
र्थः यन्मंत्राः यन्मंत्रे तेषां मंत्राणामंतेतः स तत्कर्मादि

का·य·स्
व्याख्या
१६

16

क्रियमाणस्य कर्मणः आदिः सांनिपातः संयोजनीयः कुतः अभि-
धानात् यतो मंत्रः पठित एव सन् कर्माणि प्रतिपादयति नान्य
था आनियमं वाक्यस्य वा नन्वपि आचार्यैः मन्त्रप्रयोगस्य का
लानियमं ब्रवीति पूर्वं क्रियमाणे वा कृते वा कर्मणि मन्त्रः प्र
युक्तव्य इति सिद्धान्तमाह आदिनाचार्याः नन्वादौ वा
मन्तानिरासार्थः सर्वेऽपि तु नयः कर्मणामादिमेव मंत्राते:
सहप्रयोजयन्तीति नियमः मंत्रैरेव स्मृतं कर्मकृत्यमभ्युदय
कारि भवतीत्यवधारयति यत्र च मन्त्राभावस्तत्र विधिवा
क्येनैव तदसंभवे उपायान्तरेणापि यदार्थः स्मृतिः का
यो नवाधाप्युक्ताः तेमन्त्राः स्तवमध्ये आधुक्ताः आदि

श्र·ध्या·क
१

मात्रेणोक्ताः सन्तः प्रयोगकाले सकलाः प्रयोज्याः यत्रादिनापूर्वा
न्तः परस्य मंत्रस्य तत्रोपात्तेनादिना चिह्नितेन पूर्वस्य मंत्रस्यां
तो ज्ञेयः नन्वेतत्र वक्तव्यं किं तु क्वचिद्वाक्यसमूहस्यैकमंत्र
त्वात्तिद्वयं पर्यन्तरव्यत इत्यदोषः तद्यथा विष्णोर्षांत्वादि
वानामाग्रपोयीस्येतिस्वामाने आसूर्याऽपहृत्येइत्यादि प्रयु
ज्यते यथा चाग्नेर्गहितिंत्रु हितिसतन ठकू कृत्सुजानइत्या
द्यानामेकमंत्रत्वं चित्यगच्छंतिपद्युदिशाइत्यादेच उपांशु
प्रयोगः प्राप्ते: तेषां यजुषां यजुर्वेदमंत्राणां कर्मसु उपांशु
प्रयोगो भवति कुतः श्रुतेः उच्चैर्ऋचा क्रियते उच्चैः सामा
उपांशु यजुषेति शाखान्तरे श्रवणात् स्वशाखायामपि स

का॰ प॰ सू॰ व्याख्या ११

17

यतु पाठः स्रुग्यजुर्भिरुच्चरन्ति अस्य त्वत्रस्यैव पञ्च सोमव्यतिरिक्तं क — अ॰ ध्या॰ खं॰ १
र्मणि तत्र होत्रादिकं विषयः नत्सांग्वेषाः सांग्वेषा निगदाः प्रोद्वा
र्णी रामादयाग्नीदुनीत्यिहरे त्येवमादयः उपांशुत्व प्रयोज्याः
कौशं वा बर्हिः बर्हिः कौशं कुशा दर्भाः तस्येदं कौशं कुशाका
शादोर्दूर्वा यव गोधूम बल्वजाः स्यवर्णिकजन्ता मुञ्जदर्भाः प्र — दर्भा
कीर्तिताः १ अथ पात्रपरिमाणं अग्न्यगारादौव सौवर्णादिहो
मे स्रुवः स्रुचोऽप्यन्य पात्रपरिमाणं भवति यावता परिमाणे
नार्थः प्रयोजनं सिद्ध्यति तावत्परिमाणं भवतीत्यर्थः प्र
योगा ब्रीहि रेव स्तुकोष्टिव ब्रीजम् इत्यन्तं स्रावाह रस्य व ब्रा
हे त्येतत्पर्यन्तं पठन्ता कर्माङ्गित्याच्चे संततं घृतं विक्षनालि

कयानिर्नीयतरस्याज्यस्यन्तोलना घृतपायेन परिमाणं निश्चित्य
तावदाज्यं यत्परिमाणाया स्रुचि माति तावत्प्रमाणानां स्रुवं
कुर्यात् तस्याज्यस्य पंचमभागसंग्राहक स्रुव कार्यः
एवं यदा षडवद्वात्या त्रायेपाव कोष्टि वैश्वानरस्यादिकं क्रि
यते तदापि वेदः पञ्चाङ्गागोऽर्थस्तावत्परिमाणेणाविपुलः
कार्यो यावति श्रवरोक्त मन्तर हवींषि तिष्ठायेन सर्वेषां
दर्भसंस्थमानासादनं संभवति तदनुसारेण प्राचीप्रमाणांगुर
मानि तिर्यक् प्रमाणं च पादानं कल्प्यते तेडुक्तं प्रान्तपर्ये याव
ती मेव स्वयं मनसा मन्येत तावतीं कुर्यात् अथ ग्रन्थान्तरनिरू
पणानि धातवस्तृणानु क्षिप्रदो पाः श्राजुजो विषमा एकत्रि

का.य.सू. व्याख्या १८

नवादिविषमसंख्याधनत्वो येषां तानि त्र्युग्मानि प्रा
गग्रे सून उदगग्रं बर्हिराचिनोति प्रागग्रे सूने संनहने उदगग्रे
बर्हिः बध्नात्यपर्यस्य स्थापयति उदगग्रे प्रागग्रमिध्मं उदगग्रे
संनहने प्रागग्रमिध्मस्य स्थापयति प्रत्यग्ग्रंथिनवगृह्णाति स्र
त्राग्रं पवीत्र प्रत्यगवगृह्णाति प्रेरयति अष्टादशेध्मं परिवृ
क्षाणां परिधीनसंवृणोः दक्षाः पालाशादिकंकतादयः परिधिवृ
क्षाः तेषां परिधिवृक्षाणां संबंधिन मष्टादशसंख्यकाष्ठि
कमिध्मं कुर्यात् एकविंशतिं वा अथवा एकविंशतिसं
ख्यकाष्ठकमिध्मं कुर्यात् ततः परिधीनके एके आचार्याः
तत्र एकविंशतिकाष्ठकादिध्मात् त्रीणि काष्ठान्यरत्निमात्रा

प्र.धा. ४

षि

ण्येवोपादाय परिधीन्परिदधाति तेहैक एध्मस्यैवैतान्परि
धीन्दधतीति श्रुतेः अथ चैकमेव दद्यात्र एकविंशतिं वा
ततः परिधीनके एके आचार्याः तस्मादेवैकविंशतिकाष्ठ
केध्मात्परिधीन्परिदधाति एतदेवयुक्ततरं हरिस्वामिनः
मते तस्मात्कुर्यादनवक्लृप्ता हि तस्यैते भवंति बाहुमात्रैः
परिधिभिरार्द्रैश्च भवितव्यं इध्मस्तु शुष्क इधनत्वादेवाधि
गमाश्च अपरिमितं प्रणायनीयं वेदनं प्रणायनस्यो
यं प्रणायनीयः तं प्रणायनीयं अग्निप्रणयनार्थमि
ध्ममपरिमितं अपरिकाष्ठकं त्रिभिः संनहनं रज्जुमेव कुर्यात्
त्रीणि संनहनानि न त्रिवृतः अपरिमितं च प्राग्यन्नेध्मं

काष्ठसंख्यायेद्वयाऽतिशेनाधिकसंख्यकाष्ठकत्वं तेनचत्वारिं
शतिसामिधेनीकोपदृष्टकामस्तत्र सप्तविंशतिःकाष्ठानि
भवन्ति ततश्चरणयनीयेततोप्यधिकानिकुर्याद्विंशतिप्र
भृतीनि इच्छासंख्यानिकाष्ठानिभवन्ति तिरृत्याज्यंवेदोसी
तियजमानोवेदंकरोति यजमानःस्वाज्यानितिर्वर्यस्वात्य
स्यात्यांहत्वावेदोसीमनेनमंत्रेणवेदंकरोति अस्यमंत्र
स्यानेकयजमानकेऊहोभवन्ति तेनवाम्यांवेदोभूयाः इतिद्वि
यजमानके तेनास्मभ्यंवेदोभूयाइतिबहुयजमानके दे
वपितृभ्योवेदोभवेतिपित्र्यायां कीदृशंवेदमित्यपेक्षा
यामाह कुशमुष्टिः सव्यावृत्तंवत्सजानुत्रिवृत्तंसूतका

पंवापशुब्रह्मवर्चसान्नाद्यकामाययथासंख्यं यथासंख्यं
यथोपदेशक्रमेण एवमाकारंवेदंकुर्युः तत्रपशुकामःकुश
मुष्टिंसव्यावृत्तंप्रदक्षिणावृत्तंवत्सजानुवेदंकरोति अ
स्यानीमीणप्रकारः कटमेवत्सवादिविलोकनीयः ब्रह्म
वर्चसकामःकुशमुष्टिंत्रिवृतंकरोति अन्नाद्यकामोमू
तकायमिति वत्सजानुरितिवत्सजानुसदृशः त्रिवृत्
गुणः मौञ्जंत्रिवृद्भवति त्रिवृतंपरिव्ययतीत्यादौत
रव थैवदर्शनात् सूत्रायावर्तिंत्रिवृत्तमिति एषामेवदेशा
त्रिवृच्छब्देनवेषणाकारत्वाय कोष्ठितुत्वात्तत्रकेनाप्यभि
प्रायेणोतिनएवाविदुः सूत्रोप्यन्नाद्यपापात्रत्रणाप्रत्यो

दिनिर्मितं न दृश्यते वेदस्य प्रमाणांपरिदृष्टे उक्तं वेदं समिता
वितं च वयमादेशा संमिति आज्यभागादितिकर्मफलं तच्च कर्म
फलं पश्वादिषु यत्र यत्र आज्यभागादित्येवमादि प्रयोगः क्रियते
तद्यथा आग्नेयाजोभ्यः आह्वानाः आवेश्य देवादिति तत्र
तच्च याप्यर्थे तदपि कर्मकर्तव्यं सर्वत्राद्भुत आशीर्विधयो
ज्ञेयः कर्मफलमाज्यभागादित्युक्ते तच्च तदपि कर्मकर्तव्यं
मंत्रवचनेच शांत्यंतं भवतीह द्रांतं भवतीत्येवमादौ मंत्रव
चने च कारात् तद्धोति पूर्वकत्वात् अनुकृष्यते तदपि मंत्रत
उक्तं शांत्यादिकं कर्तव्यं प्रतिकर्मोद्धरणे प्रसंगे प्राति
कर्मधर्मकर्म प्रातिस्वैककर्मस्थपक्वं पृथक् आहवनीय

दाक्षिणाग्न्यो गार्हपत्याद् उद्धरणं कर्तव्यं अप्रसंगे सति अन्या
र्थमनुष्ठितस्य अन्येन उपजीवनं प्रसंगः नप्रसंगः अप्रसं
गः तस्मिन्निति तेन यदि दर्शपूर्णमासपश्वादौ पूर्वमुद्धृतो
अनुपलभ्यते नित्यकर्मकाले तदा तत्कर्मार्थं पुनः उ
गु॰ पश्चाद्धरणं न क्रियते तयोरेव तदपि नियतकालीनं कर्म
क्रियते यथा अग्निहोत्रमागतोपस्थानादिकं च उ
न राधनानंतरं धरणे कृते विकृताद्दिष्टपशुयागस्थालीपाकादि
कं च अपवृत्तकर्मा लौकिको वा संयोगात् अपवृत्तं स
माप्तं कर्म यस्मिन् सोऽपवृक्तकर्मा आहवनीयो लौकि
को भवति वैदिकमाहवनीयत्वं संस्काररूपं ततोऽपगत

का॰ व॰ सू॰
व्याख्या॰
२१

प्र॰ ५ क॰
१

तीत्यर्थः कुतः अर्थसंयोगात् यदर्थमुत्पन्नं तत्स्य तेनार्थेन प्रयो
जनेन संयोगात् तेन यत्कर्मार्थमुत्पन्नं तत्तत्कर्मणामाप्रयवंतरलौ
किको ज्ञेयः अत एव पौर्णमास्यादौ यदि वत्साः दृष्टयः दृष
कांत्वाः क्रियंते तदा प्रतीच्छि दृष्टकपालगोवोहरणं कार्यमिति
कुत्पन्नत्त एव सर्वकामनुष्ठानमिति अप्रकरणोत्पत्तिरनारम्भवा
दः आश्रयित्वात्सर्वगुणः नविद्यतेकस्यचित्कर्मणः प्रकरणेउ
त्पत्तिर्यस्य असौ अप्रकरणोत्पत्तिः किंचित्कर्मारभ्योपक्र
म्य उच्यत इत्यारम्भवादः नारम्भवादो नारम्भवादः यस्य प
र्णमयी जुहूर्भवति खादिरः स्रुवो भवतीत्यादिर्यो विधिः कस्य
चित्कर्मणः प्रकरणे च पठितो न भवति अतश्चित्कर्मणि:

नचांग

खादिरः स्रुवो भवतीत्येवं विधः यस्य प्रकरणे न वाक्यैर्न भ
वति स एवंविधः पर्णमयीत्वखादिरत्वादि विधिः सर्वगुणो
भवति प्रकृतौ विकृतौ चास्य साधारण एवोपदिष्टो भवति कुतः
आश्रयित्वात् आश्रयोऽस्यास्तीत्याश्रयी तस्य भावस्ता
त्व तस्मात् स्रुवजुह्वादेः प्रकृतिविकृत्योर्विद्यमानत्वादेवं विधे
ऽनारम्भवादः सर्वगुणः प्रकृतिविकृत्योरुभयोरपि अंगमिति
प्राप्ते सिद्धांतमाह प्रकरणे नाविशेषात् चकारोऽवधार
णे प्रक्रियंतेऽस्मिन्धर्मा इति प्रकरणं प्रकृतिः अप्रकरणो
त्पत्तिरनारम्भवादरूपो विधिः प्रकरण एव कृतो एवानि विधा
ने नोभयत्र प्रकृतौ विकृतौ चेति कुतः अविशेषात् यत्रा

का॰प॰प्र॰ २२

प्रोदकः प्रकृतितः सर्वमंगजातं प्रकरणपठितं ग्रनारभ्यवाद प्रा प्र॰ध्या॰सं॰
पितं चाविशेषेण विकृतो प्रापयति तथाहि किंचिद्विकृतौ दका १
स्सर्वं निविपति पश्चाधा नाद्य: आश्रयभूतयो: स्रुवजुह्वोः
प्रोदकमन्तरेणासंभवात् ततोनेनाविर्भ--दिश्यते तत्रचोदकेन
प्रापितस्सति पश्चादनारभ्यवाद विधिः पुनः प्रापयेत्तर्हि पुनरुक्तता दोषः
स्यात् अतश्चोदकेन प्रापितत्वात् तेनाविधेः वैयर्थ्यादनारभ्य--
--: प्रकृतावेवनिवेश इति सिद्धान्तः उलिदर्शनाच्च विकृतौ प्रयाजा
दीनप्राकृतानां धर्माणां दर्शनायेवंज्ञायते यदनारभ्यवादविकृ
तौ चोदकात् पूर्वं नानिविशंत इति यदिपूर्वं निविशेस्तदा वैकृ
तप्रधान मनारभ्यविधि नेव प्रसिद्धिकपय ज्ञातसान्निध्यकांक्ष:

त्यात् प्राकृतान्यंगानिनगृह्णीयात् तदा च विकृतो प्रयाजादीनां
प्राकृतानां दर्शनं न स्यात् अस्तिच तथाहि अश्वमेधे इध्य
सावित्रीमिष्टिं निर्वपति प्रकृत्य तस्ये प्रयाजेषु त्वायमानो षडि
तिमन्त्रगणाम्नानाविधि परे वा प्राकृतान्स्रयजान्दर्शयति कौ=
तस्मादनारभ्यवादाः प्रकृतावेवनिविशन्त इति सिद्धं वैकं
कतानि पात्राणि यजपात्राणि सर्वाणि वैकंकतानि विकंक
तवृक्षकाष्ठघटितानि भवन्ति यतो विकंकतः समभवत्तस्मादे
षपात्रिपायज्ञपात्रीयोवृक्ष इति श्रवणात् सामान्यसूत्रमे
तत् अस्यापवादमाह खादिरः स्रुवः स्रुवः खादिरः स्यात्
स्फ्यश्च चकारात् स्फ्योवक्त्रोपिखादिरः स्यात् खादिरस्स्फ्य इति
श्रुते

पालाशी जुहूः हूयतेऽनयेति जुहूः स्रुक् सा च पालाशी स्यात् यस्यैव
पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति श्रुतेः खादिरः स्रुव
त् उपभृत्संज्ञिका स्रुक् आश्वत्थी ध्रुवा तु वैकंकती भवति वै
कंकतानि पात्राणीत्यनेनैव अपवादाभावात् होमसाधनत्वा
त् तथा हि समिष्टयजुर्हूयते त्रिष्टुभ अवयवान् समिष्टयजुर्जुहोती
ति श्रावणान्तरश्रुतेः वारणान्य होमसंयुक्तानि यैर्होमः क्रियते
तानि होमसंयुक्तानि अहोमसंयुक्तानि यै होमो न क्रियते तानि
वारणानि भवन्तीत्यर्थः तत्र वारणान्युदाह्रियन्ते उलूखल
मुसलकूर्चेडापात्रीपुरोडाशपात्रीशम्याष्टत्वावदानाभ्युप
वेषां तद्वनिकर्षणादीह रणापडवत्तव्रलयजमानस्य होत्वम

दृत्तादीनि ततोलूखलमुसलयोर्विशेषः मुसलोलूखले गार्दे
ध्यायते रुद्दहे तथा इध्मापवनाशोभवतः शूर्पं वैणवमेव वेति
तथा खादिरं मुसलं कार्यं पालाशः स्यादुलूखलः मध्यो भौः
वारणौ कार्यौ तदभावेऽन्यवृक्षजाविति कूर्चो बाहुमात्रः
पीठाकारः इडापात्री अरत्निमात्री मध्ये संगृहीता तथैवाद्वि
तीया हविष्परिणापात्री अरत्निविपुला पिष्टपात्रीति सैवोच्य
ते पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा अपर्याप्तखंडपुर
लपरिमितपरिमंडलावती लोकान्तरे शोष प्रतिपत्तिरिति
कठसूत्रात् प्रादेशमात्रं वं ... दक्षिणांगुष्ठपर्वमात्रव पृथुमुखं च
तावदानं अरत्निरत्निमात्रवृत्ती दक्षमुखः उपवेशोऽरत्निमात्रः

प्रादेशमात्रोवाह स्याकृतिः अरत्निर्वैकंकतस्त्वद्दचंद्राकारो द्वादशां
गुलः प्राशीत्रहरणास्यत्वाकारं वक्ष्यामि षडवत्तं चोभयत्रखा
तवत्र आसनानि चारत्निमात्राणि प्रादेशमात्राणि वा प्रादेश
मात्राणि इष्टयावि सर्वेष्वपात्रेषु मूलाभिन्नापकानि वैकंकतानि का
र्याणि एतान्य होमसंयुक्तानि धारणानि अन्यावैकंकतान्युच्यं
ते आवाग्निहोत्रहोमार्थस्रुक्स्रुवः सोमयागेग्रहचमसद्रो
णकलशादीनि च तत्रापि हविर्धानाद्ये षवरगाफलकपरिप्र
वसंभरण्यादीन्यहोमसंयुक्तानि धारणान्येव षोडशिपात्रं
खादिरं महद्दृढं राग्रहाणां पात्राणि धारणानि आवसथ्य
पात्राणि अहोमसंयुक्तानि धारणान्येव प्राणित्राद्यो हरणी

पात्रदर्वीवैकंकतादीनि यज्ञपार्श्वे चमसानां त्रवक्ष्यामि दंडांस्तुचतु
रंगुलाः त्र्यंगुलस्तु भवेत्स्कंधो विस्तारश्चतुरंगुलः वैकंकत
मयाः प्रवृत्ताश्च त्वग्बिलाश्च समाः स्मृताः अन्येभ्या वाधिका
र्यास्तेषां दंडेषु लक्षणं होतुर्मंडलएव स्याद्ब्रह्मणश्चतुरस्रकः उ
द्गातुरश्च त्र्यश्रिः स्याद्यजमान एव स्मृतः १ प्रशास्तुरवतष्टः
स्यादुत्तरस्योब्राह्मणाच्छंसिनः पोतुरग्नेर्विशारवीस्यान्नेष्टुः स्याद्वि
गतीनकः २ अच्छावाकस्य रास्नावच्चाग्नीध्रस्य मसृखकः
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्मणि ३ पालाशान्य
वटाद्याः न्यवृद्दा चमसाः स्मृताः इति स्मृत्यर्थसारे
सामित्यावित्रं वेदं च मुसलोलूखलं प्राहात् नान्युखांसंदी उप

परवाद्धाभ्यां स्नाकृउष्कारांशीच शमस्तस्नुविषाशानिचरत्नीनां
प्रेदूत्तराणानिच कुर्यात्प्रादेशमात्राणि महावीरस्त्रुयस्तथा प्रोल
कलशाग धिषवराफलके स्नुग्दंडपरिधि इध्मूलानि स्पयश्यपोपी वेदे
ध्माद्विपिहशायनीयाद्विधिवपाश्रपण्यौ कुर्याद्रत्निमात्राणि
ति वाहुमात्रः स्वाचः पाणिमात्रपुष्करास्त्वग्बिलाः समूल
प्रसेकामूलदंडा भवंति पाणिः प्रमाणमस्य तत्पाणिमात्रं
पाणिमात्रं पुष्करं मुखं यासां ताः स्नुचः भवंति त्वाचि त्वक्
देशोबिलं मुखं यासां ताः त्वग्बिलाः हंसमुखवत्सदृशः प्रसेकः प्र
णालिकाया सां ताः हंसमुखप्रसेकाः मूले दंडो यासां ता मूल
दंडाः अरत्निमात्रः स्नुवोंऽगुष्ठपर्ववृत्तपुष्करः स्नुवोऽरत्निमा

त्रो भवति अंगुष्ठपर्वशाऽर्घवृत्तमंगुष्ठपर्ववृत्तं अंगुष्ठपर्वप्रमाणं वृ
त्तं वर्तुलं पुष्करं मुखं यस्य सोऽङ्गुष्ठपर्ववृत्तपुष्करः पर्वश
ब्दः संधिवाची पर्वग्रंथिपरिमाणं चन्द्रस्य कलात्वात् देवचन्द्र
स्य मंडलं विवक्षितं पायेन वृत्तं विधयतत्प्रमाणं कच
स्य पुष्कर नासिकावत्खातं चस्यात् स्पयोऽसिकृतिः अ
सिः खड्गः असेरिव आकृतिर्यस्यासा वस्याकृतिः स्पयोवज्र
आदर्शाकृतिः प्राशित्रहरणं आदर्शो दर्पणः तस्याकृ
ति राकारो यस्य तत्तद् आदर्शाकृति आदर्शः सदृशं वर्तुलं
तत्वावदान विधानच खातवत् प्राशित्र हरणं भवति चमसा
इतिव चमस्यैवाकृतिर्यस्य तच्चमसाकृति वा विकल्पे चावा

का.प.सू. व्याख्या २६ लोत्करावंतरेणसंचरः संचरंत्यनेनेतिसंचरो गमनागमनमार्गः प्र.धा.खं. १
76 चात्वालोत्करौ तयोरंतरालेनसर्वेषांविहितकार्यार्थसंचरः अ
ध्वं च सोत्तरवेदिकेषु वरुणप्रघासमहाहविः पशुसोमेषु त्रेयः प्र
णीतोत्करावितिष्वेषु मध्ये तरे संचर इत्यनुवर्तते इष्टिषु दर्शपूर्ण
मासादिषु प्रणीतोत्करावंतरेण गमनागमनार्थसंचरः इत्यु
दितभावेनारंभ्यस्त्यान्निषिद्धत्यान्नस्य चोदितस्य विहितस्य कृत
स्य व्रीहियवादेर्मुख्यद्रव्यस्याभावे तल्लाभे प्राप्तो सत्यां का
म्यस्य कर्मणः अनारंभोऽप्रयोग एव भवति कुतः नित्ये हि त्वा
त् तेनैवासिद्धिर्यस्य तत्सिद्धिः तेनैव द्रव्येणासि प्रतिना
ऽपेन नियते सामान्यतः प्रतिनिधिः स्यात् यथाशक्तिप्र

योगस्यश्रावितत्वात् नियते नित्ये कर्मणि दर्शपूर्णमासादौ
कृतद्रव्याभावे सामान्यतः मुख्यद्रव्यसादृश्यात् प्रतिनिधि
र्भवति कृतद्रव्यसदृशेन द्रव्यांतरेणापि नित्यं कर्मारंभणीयं
नारंभान्नियमः काम्येपि आरंभादूर्ध्वं समाप्तेर्नियमोऽयमा
वश्यंभावः आरंभादिति हेतौ पंचमी तेनारंभ एव समाप्तेः
कारणं यत्र आरब्धं काम्यं तत्रावश्यं समापनीयमेव समाप्ते
श्च मुख्याभावे प्रतिनिधिमुपादानं विनानभवति दोषश्चा
समाप्तेस्यात्सामान्यात् किंच आरब्धस्यकाम्यस्यासमा
प्ताववसमापने दोषः स्यात् कुतः सामान्यात् आरब्ध
स्यकाम्यस्यावश्यकर्तव्यतया नित्येन समान त् दर्शना
त्वा

 ऽ एवमवसीयते यन्मुख्यद्रव्यस्याभावे द्रव्यान्तरं प्रतिनिधेयमिति
तद्यथा यदि सोमं न विन्देत् पूतीकानभिषुणुयादिति अन्या
र्थं दर्शनं पुनर्ग्रहणात् अन्यार्थं सत् दर्शनं भवति तद्धि
दर्शनं कथ्यते यदन्यविधिपरं सत् प्रसंगादन्यमर्थं सिद्धं ज्ञा
पयति यथा स्येन याजेष्वेता यमानेष्व ब्राह्मणो वीराणां गण्यो
दक्षिणा॰ नायाजा यतीत्यनंतं वाक्यं नाय्याजनवविधिपरं सद्
रयागिष्टोपयाजान्विप्रान् दर्शयति यदि सोमं न विन्देदित्यत्र
तत्तादृशं दर्शनं न भवति कुतः पुनर्ग्रहणात् सोमाभावे सति
पुनर्द्रव्यान्तरस्य पूतीकलक्षणस्य ऽप्राप्तस्य ग्रहणात् विधा
नात् अथ पक्षसिद्धान्तमाह अन्यार्थं पुनर्ग्रहणं पूतीकानभि
षुणुयादित्यत्र पुनर्ग्रहणमेवान्यार्थं पूतीका प्रतिनिधेनि
यमार्थमित्यर्थः नन्वत्र प्राप्तानां पूतीकानां विधानार्थं सो
माभावे सदृशो यः स सदृशोऽपि प्राप्तेषु पूतीकानियम्य
ते विचारस्यैतस्य योजनं प्रतिनिधिनियमपद्धे पूतीकं वि
नाशे सोमसदृशस्योपादानं कर्मणः मुख्यद्रव्याभावे द्रव्यां
तरेणापि परिसमाप्तेर्दर्शनं भवत्येवेति सिद्धं अथेदं विचार्य
ते सोमे पयो व्रतं ब्राह्मणस्य यवागूः राजन्यस्यामिक्षा वैश्यस्ये
स्मिन् व्रते किं प्रतिनिधिर्भवत्युत न भवतीति तत्र पूर्वपक्षमाह
व्रते प्रसंगो नानियमशब्दात् व्रते पयोव्रतादौ प्रतिनिधेः प्रसं
गो न भवति कुतः नियमशब्दात् नियमप्रतिपादकः शब्दो

का·य·सू
व्याख्या
२८

78

नियमशब्दः एवकारः सोऽत्र श्रूयते व्रतं ८ येवास्यातोशानं भवती | प्र·धा·स्वं
ति एवकारेण प्रतिनिधिरेव निवार्यते अन्यस्य निवारणीयस्या
भावात् एवं पूर्वपक्षिते इदमेव सूत्रं सिद्धान्तपरतयापि व्याख्या
यते द्रव्येपि प्रतिनिधेः प्रसंगो भवति प्रतिनिधिर्भवत्येव कु
तः नानियमशब्दात् यत्रो नायं नियमशब्दः नह्ययं नि
यमं प्रतिपादयितुं शक्तः यतोऽस्याभिप्रायानस्तु त्वर्थः
उदाके शाप्रमश्रोर्वपनाद्यत्काम येत तदश्नीयादिति श्रुता
शानं हि प्रकृत्यैतत् श्रूयते व्रतं ८ येवास्यातोशानं भवतीति
अतस्तत्संस्तव एवायं अतो न तत्र्यायर्थे प्रमाणमिति न प्राति
निधिनिवारणाय प्रभवति तस्माद् व्रतेपि प्रतिनिधिर्भवत्ये

व शब्दे विप्रतिपत्तिः प्रतिनिधयुपात्तेपि विहितद्रव्यवाचिनि
शब्दे अविप्रतिपत्तिरपि परिणामोऽनूह्यो भवति अग्नीषोमी
यस्य छागस्य वपाया इत्यत्र हितमेवपि प्रयोज्यं न तु मेषस्येत्ये
वं विपरिणामरूपमित्यर्थः कुतः यतः प्रतिनिधिः श्रुतेरुप
गृह्यते न तु द्रव्यान्तरबुध्या अतछाग एवायामिति बुध्या
गृहीतत्वात् न छब्देनैवाभिधानं सोमेन जात्यभावात् सो
मो नेति तृतीयैकवचनं सोमाभावे पूतीकेरूपात्ते सोमे
नेति सोमशब्देनैवाप्तपूतिकानामाभिधानं कर्तव्यमत २८·पु
र ८ श्रुष्टे देव सोमाप्यायतामित्येवं न तु पूतीकाशब्देन अ
न्यवादर्शनात् अविप्रतिरित्यनुवर्तते एषदाजपेनायया

जानन्नजानीतिवाचनिके एषदाज्ये सत्यपि आवाहनादि निग
मेषु आज्ये आज्यशब्दे आविधाति पत्तिरविकारः देवाना
माज्यपानित्येववक्तव्यमित्यर्थः कुतः अदर्शनात् आ
ज्यव्यतिरिक्तस्य द्रव्यांतरस्य दर्शनात् तथाहि स्याद्वि
कारे यदि तथाहि एषछद्वो लौकिके चैत्रवनः वषट्कु
र्वन्नपीदिति गुरांच संपादायितद्दधिगृह्यते तस्मा
दविकारे गोवापानामित्येववक्तव्यमितिसिद्धांतः किंच पशौ
मंत्रवर्णात् पशावेवोत्तमप्रयाजात्प्रैषे पठ्यते स्वाहादेवा आ
ज्यपा इति वनस्पति प्रैषेपि देवानामाज्यपानां प्रियाधा
मानीति स्विष्टकृत्प्रैषेपि अयाड्देवानामाज्यपानामिति त

त्रानियमतः एषदाज्ये नेवानुयाजा इज्यंते अत एव पशुसंबं
धिनो मंत्रवर्णाद्देवानाज्यपानित्यादाबूहेप्रभवतीतिगम्य
ते किंच श्रुतेश्च एकके चवनश्रुतेरप्यत्रैकस्यैवप्राधान्यं
गम्यते नोभयोः अपएषदाज्यं गृह्णातीति यदि चात्रदध्नो
पि प्राधान्यं स्यात्तदा द्विवचनं श्रूयेत न च श्रूते अत एक
वचनश्रुतेरप्ययमेवार्थो वसीयते यदेकस्यैवात्र प्राधा
न्यमिति तत्त्वान्यास्येवेति प्राकृसाधितं अयेदं विचार
यते व्रीहिभिर्यजेत यवैर्यजेतेति विकल्पेन विहिते दृ
भयेषु मध्ये एकेन व्रीहिद्रव्येण आरब्धकर्मणि तस्य नाशा
दौ पापहारादिके जाते पश्चाद्यदि व्रीहयो न प्राप्यंते तदा किं

वैकल्पिकं द्रव्यान्तरं यवरूपादेयं उत व्रीहिसदृशमिति तत्र मु
ख्यद्रव्ये सति प्रतिनिध्युपादानस्यायुक्तत्वाद्यवानामुपादाने
प्राप्ते सिद्धान्तमाह विकल्पे त्विति कर्मान्तरत्वात् विकल्पे सति
यत्र वृत्तं येन कर्मारब्धं तदेव तस्मिन्प्रयोगे अङ्गं इतरद्वैक
ल्पिकान्तरमनङ्गं तेन व्रीहिभिः प्रयोगे उपक्रान्ते तेषामपहा
रादौ अलाभे च व्रीहिसदृशा नीवारादिकमुपादेयं न तु वैकल्पि
का यवाः कुतः कर्मान्तरत्वात् व्रीहिभिरारब्धे यवैः क्रियमा
णं कर्मान्तरमेव स्यात् तथैव प्रतिनिधौ प्रवृत्ते तस्यैव तस्मि
न्प्रयोगे अङ्गत्वात् तदपचारे तत्सदृशमेवोपादेयं न तु मुख्यं
तत्सदृशं वा तस्य तत्प्रयोगानङ्गत्वादिति प्राप्ते सिद्धान्तमाह

प्रतिनिधौ तत्कालात् प्रतिनिधिद्रव्ये नीवारादौ विनष्टे न
प्रतिनिधिभूतनीवारादिसादृश्येन प्रतिनिध्युपादानं किन्तु
मुख्यद्रव्यमेव व्रीहिरूपमुपादेयं संभवे तदसंभवे तु मुख्यसा
दृश्येन नीवारादिः प्रतिनिधिरूपादेयः न तु प्रतिनिधिनी
वारसादृश्येन कुतः तत्कालात् स कालो यस्यासौ तत्का
ला भावप्रधानो निर्देशः प्रतिनिधेस्तत्कालत्वादित्य
र्थः यतः प्रतिनिधेः सर्वकालो मुख्यद्रव्यस्याभावः
तेन प्रतिनिधौ नीवारे विनष्टे मुख्यस्य लाभे मुख्यमेव ग्रा
ह्यं तदलाभे नीवारादिकं व्रीहिसदृशमेवेति न तु कदाचिद्व्री

दारसंग्रहामित्यर्थः अथ यत्रार्थद्रव्ययोर्विरोधस्तत्र कथं
न ह्यथा मुख्यं द्रव्यं खदिरादिकं वियोजनादिकार्यासमर्थं
विद्यते प्रतिनिधिद्रव्यं च कार्यसमर्थं तत्र यदि मुख्यं द्रव्यं
गृह्यते तदा तत्कार्यं नियुक्तपश्वनपक्रमस्वरूपं नासिध्यति
यदि च कार्यसिद्धिसमर्थं प्रतिनिधिद्रव्यं गृह्यते तदा मुख्य
द्रव्यं गृहीतं न स्यात् तत्रैव संदेहः किं कार्यसाधनं समर्थम
पि मुख्यं ग्राह्यं उत मुख्यमनादृत्य कार्यसमर्थं प्रतिनिधि
द्रव्यमिति तत्र मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन
मुख्यस्यैव परिग्रहे प्राप्ते सिद्धांतसूत्रं अर्थद्रव्यविरोधेर्थो

सामान्यं तत्परत्वात् अर्थः प्रयोजनं कार्यमिति यावत् द्र
व्यं मुख्यद्रव्यं अर्थद्रव्यविरोधे कार्यमुख्यद्रव्ययोर्विरोधे स
ति अर्थसामान्यं अर्थेन प्रयोजनेन कार्येण सामान्यं संयु
क्तं कार्यसिद्धिसमर्थं यत् तदशक्तमपि प्रतिनिधिद्रव्यं उपा
देयं कुतः तत्परत्वात् द्रव्यस्यापि परत्वात् कार्यार्थत्वात्
कार्यार्थं हि द्रव्यं न तु अदृष्टार्थं येन च कार्यं नास्ति प्राप्ति
तन्न अशक्तमपि सदशक्तमेव अतो द्रव्यस्य प्रयोजनार्थत्वा
त्तद्विरोधे अशक्तमप्यनादृत्य प्रयोजनक्षममेवाशक्तमपि
प्रतिनिधिद्रव्यमेवोपादेयं न तु मुख्यं कार्यासमर्थमिति॥
सिद्धांतः अथ शाप परिमाणाय शेषकार्ये अप्यशक्ता पर्याप्त

का·प्र·स्· व्याख्या ३२

प्र·धा·खं· १

पुरोडाशजातिमात्राभिव्यक्तिसमर्थाः व्रीहयो ऽल्पा अपि लभ्यन्ते तदा
दा तैरेव पुरोडाशः कर्तव्य उत नीवारैः इति संशये पूर्वपक्षे
सिद्धान्तमाह अवयवमात्रपर्याप्तिर्हि द्रव्यस्यासंभवे पुरोडाश
महत्त्वार्थं नीवारपरिग्रहः एवमात्राप्यापि प्रधानया
गसाधनसमर्थं कवद्धयत्रयपरिमाणमपि यावद् द्रव्यं लभ्य
ते कथंचित् तावद् ग्रहणमत्राप्यालाभे इति चरू नभवतः
अवदानमात्रसमर्थमुख्यद्रव्याभावे त्वर्थद्रव्याविरोधे ऽ
र्थसामान्यमिति न्यायेन प्रतिनिध्युपादानमेवयुक्तं इ
स व्रीहिरतां नरव्यावीर्भिन्नानामिति तत्र व्रीहिप्राप्तस्य सापि कि
ञ्चित् स्वरूपं संपादितं भवति अतस्तेषामेव नीवाराणामुपादा

ने प्राप्ते आह गुणद्रव्ययोर्द्रव्यं प्रधानयोगात् गुणद्रव्य
योर्विरोधे ह्यत्वादि गुणमुख्यद्रव्ययोर्विरोधे सति गुण
मनादृत्य द्रव्यमेवोपादेयं गुणानुरोधेन प्रतिनिधि
द्रव्यं कुतः प्रधानयोगाद् द्रव्यस्य यतो द्रव्यं प्रधानेन
युज्यते यतस्तत्र न्यस्यमानं यागं साधयति अतो या
गस्य द्रव्यं सन्निकृष्टं गुणो विप्रकृष्टः अतो गुणमना
दृत्य मुख्यद्रव्यमेवोपादेयमिति एवं प्राप्ते पूर्वपक्षमाह
न समत्वात् द्रव्यमेव प्रधानयोगीति यदुक्तं तन्न कुतः
समत्वात् उभयोर्गुणद्रव्ययोः सदृशत्वात् द्रव्यमपि
प्रधानयोगि प्रतत्वाद् गुणो ऽपि इत्येवं प्राप्ते उक्तमेवासि

प्राप्तं द्रष्टव्यमिति गुणानुग्रहात् गुणेनानुगृहीतं विशेषितं द्रव्य
मेव प्रधानमिति गुणस्तु तद्विशेषणमात्रं विशेष्यं तु द्रव्य
मेव अतो विशेषणविशेष्ययोर्विशेष्ये संप्रत्यय इति न्या
यात् द्रव्यमेव गुणानुगृहीतं प्रधानमिति नैतदुभयं समं।
किंतु अग्निहोत्रे ध्रुवत्सायाः अग्निहोत्र्याः पयसोऽभावे
ध्रुवत्सत्वलक्षणं गुणं हित्वा स्त्रीवत्सायाः अप्यग्निहोत्र्याः पय
सा होतव्यं एवं पालाशानां परिधीनामाहरणाभावे
कार्ष्ण्यरूपं गुणं त्यक्त्वाप्यन्यापि पालाशा ग्राह्याः
वाजपेयाग्रयणाभावे अन्यवृक्षमात्राण्यपि एवं सर्वत्रो
ह्यं यदि पुनः खादिरत्वं त्यक्त्वा कृत्स्नापि संस्काराणां

अयोग्यः नियोजनमात्रेयोग्यः कदरस्य महाप्रसंस्का
रयोग्यस्तदा कस्योपादानमिति संदेहः नत्वसंस्कार
वत्कदरोपादाने खादिरविधौ विकल्पमात्रत्वेनात्यंत
पीडाभावात् अतः कदरस्य खादिरोपादाने तु संस्कारविधी
नामत्यंतपीडाप्रसंगात्प्रातीतिकखदिरे बाधोपादेयः सिद्धं
नहि गुणानुरोधेन प्रधानं परोद्व्यं भवति नैव भवतु
संस्काराणामत्यंतपीडा नतु प्रधानं तदनुरोधेन कथं
चिदपि पीडयितव्यं तस्मात्खदिरादिकं संस्कृत एव ख
दिरे पशुं नियुंजीत तदुक्तं जैमिनिना श्रुत्याधिगमे मुख्य
मागमो हितदभावादिति यदापुनः मुख्यं खादिरमल

34

ल४पं२

ख्याप्रतिनिधिंकदरमुपादायतद्वारणादिषुकतिचित्संस्का
रेषुकृतेषुप्राक्पशुनियोजनात्खदिरेलब्धे तदाकिंपूर्वप्रति
निधिनाकार्यंकुर्यात् उततत्त्यागेनमुख्यमेवोपा
देयंसंस्कारांश्चपुनःकुर्यात् इत्येवंपशुनियुंजीतेतिसंशये
प्राप्ते सिद्धांतमाह सतिमुख्येप्रतिनिधिनाक्रियमाणासंबि
गुणास्यात् अतःसंस्कृतमपिकदरंहित्वाखादिरंसंस्कृत्य
तस्मिन्पशुर्नियोक्तव्यः येचकदरेकृताःसंस्कारास्तेषां
खादिरेआवृत्तिःस्यात् प्रधानत्वेनगुणावृत्तेर्न्याय्यत्वा
त् एवंपशुव्रीह्यादिष्वपिद्रष्टव्यं तत्रापिप्राक्त्यागात्
मुख्यद्रव्यलाभेसंस्कृतमपिपुरोडाशादिकंप्रतिनिधिद्र

व्यनीह्यादिकंत्यक्त्वामुख्यद्रव्येणपुरोडाशांतरंसंस्कृत्यतेन
यागःसाधनीयः नियोजनेकृतेलब्धोऽपिखादिरःऽनर्थ
कएव अयमेवेदंविचार्यते यान्येकप्रधानसंबंधीन्यंगकर्मा
णि किंतेषामनुष्ठानेकश्चित्क्रमनियमोनास्तिउतास्तीति
तत्रतावत्पूर्वपक्षमाह कर्मणामानुपूर्व्यंनयुगपद्भा
वात् आनुपूर्व्यंपौर्वापर्यंक्रमइत्यनर्थांतरं कर्मणामि
ति अग्न्यन्वाधानादीनामंगकर्मणामनुष्ठानेआनुपूर्व्यं
नभवतिक्रमनियमोनभवति कुतःयुगपद्भावात् यतस्ता
न्यंगानियदाप्रधानेनपेक्ष्यंते तदायुगपद्भावेनैवसहैवप्र
संबंधंप्राप्नुवंतिनक्रमेण तत्रक्रमेषांनियतत्वेनक्रमेणानुष्ठा

का॰श्र॰सू॰ व्याख्या ३५ 35

नैकारणाभावात्स्कर्त्रैकत्वादवश्यंभाविनीक्रमेयेनकेनचि प्र॰ध्या॰ १
दनियतेनक्रमेणानुष्ठानं अर्थादितिचेन्नैष येनकेनचित्क्र
मेणांगानुष्ठानेक्रियमाणेऽपि निर्वृत्तिरंगकलापनिष्पत्ति:
स्स्वेनैवभवति नियतक्रमेण क्रियमाणेतुनियतक्रमके
मस्यानागतस्य कस्कस्य: प्रतीक्षणेनविलंबात्बहुनाकाले
नस्यात् तथासतिप्रयोगस्याशुभावोनस्यात् प्रधानस्य
त्यासन्नकालो ह्यंगानांविहित: अंगानांनियतक्रमेणानु
ष्ठानेचसोऽपिकालोतिक्रांत:स्यादिति तस्मादंगानुष्ठानेक्र
मनियमोनेतिपूर्व:पक्ष: सिद्धांतमाह स्याद्वानुपूर्व्यनिय
म:श्रुत्यर्थक्रमेभ्य: वाशब्द:पूर्वपक्षनिरासार्थ: अग्न्या

न्वाधानादीनांमंगकर्मणामानुपूर्व्यनियमस्स्यात् अनुष्ठानेक्र
मनियमोभवेत् नानियम:केभ्य:श्रमापाठेभ्य: श्रुते: अर्थात्
क्रमाच्च श्रुतेस्तावत् यथा द्वादशाहे तेषांगृहपति:प्रथमो
दीक्षते अथब्रह्माणंदीक्षयतिअथोद्गातारमथहोतारमित्यादि
नात्रब्रह्मादीनांदीक्षाविधीयते यजमानत्वादेवतस्या:प्रा
प्ते: क्रमस्यतत्रान्यत:प्राप्त्यभावात्सएवात्रविधीयते तथा
तस्मादेषदग्रामोग्रहोगृह्यतेतृतीयएववषट्क्रियतइत्यत्रा
यमपिश्रुतिक्रमएव अर्थादपिक्रमोवगम्यते तद्यथा
पेषणासंवपनयोरवघातपेषणयोश्चतथाग्निहोत्रंजुहोतीय
वागूंपचतीति क्रमेणाश्रुतेऽपि अर्थात्सर्वपाकस्ततोहोमइति

का॰य॰सू॰ होमद्रव्यहिर्यवाग्वः तंडुलस्त्वर्थः अन्यालिंगेनच पाकः स प्र॰ध्या॰
व्याख्या अपूर्वाक्रियमाणेऽनर्थकः स्यात् होमोऽपिक्रमसानिध्ये १
३६ नानिवर्तेत ऽतः पश्चाद्धोमः कार्यः क्रमः सच द्विविधः श्रु
तिपाठक्रमो मंत्रपाठक्रमश्च उभयविधेऽपिक्रमनियमेका
76 रणं भवति नियतेनाहिक्रमेणपदार्थविधिपाठो मंत्रपाठ
श्च वर्तते नत्वेवमाम्नायते येनक्रमेणपदार्थविधिपाठो मंत्र
पाठश्चते नैवक्रमेणानुष्ठानमिति क्रमांतरेणानुष्ठा
नमिति क्रमांतरेणानुष्ठाने क्रमगतस्य क्रमस्य त्यागः
अनवगतस्य क्रमस्योपादानमित्यसंगतंस्यात् तस्मात्पाठ
क्रमादपिक्रमनियमोंगकर्मणां भवतीति प्राकृतंचविकृतौ

अत्रापिकारणान्पाठक्रमेणांगकर्मणामनुष्ठानं भवति य
तो विकृतौ प्राकृतमेव पदार्थानां क्रमं श्रुतिरनुवदति यथा
महापितृयज्ञे सततं एव प्राकृतं वयज्ञ हरतीत्यादिनासयज्ञोपवी
ती भूत्वाज्यानिगृह्णातीत्येव मंत्रेन आज्यग्रहणोयज्ञोपवीती
त्वविधिपरे वाक्ये प्राकृतं क्रमं दर्शयति यदि पाठक्रमेणानु
ष्ठानं नस्यात् तदा तेनैवक्रमेणानुवादो नस्यात् अत्रपरेत्व
न्यथा व्याचक्षते प्राकृतं च विकृतौ विकृतौ प्राकृतवैकृतयोःक
र्मणोः सन्निपाते प्राकृतं पूर्वं कर्तव्यं पश्चाद्वैकृतमिति तद्यथा
वैकृतो प्राशित्रं चनुष्याहत्यालभ्यानमालभंते इतिप्रस्तरस्तरणा
नुप्रहरणानंतरं मासमालभंते उक्तः विकृतौ प्रकृत्यस्तरणं तेनचरति

का॰य॰सू॰ व्याख्या ३२ इति तत्राननुग्रह हरणात्तरं वाजिनयाग उक्तः तत्र पूर्वं प्राकृतं त्वात्मा सू॰ध्या॰खं॰ १

37

लंभोदकस्पर्शात् पहूत्वा पश्चाद्वाजिनयागः कार्यः तथा विकृ
तौ हविरासादनात्तरकालं हविरालंभनात्मा लंभोदकालंभा विहि
ताः विकृतौ वासादनं चाहवीठः प्यास्निमंथन्तीत्याग्नि मंथनं हवि
रासादनोत्तरकालं विहितं तत्र पूर्वं प्राकृता हविरालंभनात्मा
लंभोदकालंभाः पश्चाद्वैकृतमग्निमंथनं एवमपि क्वासाद्य
न्नूचोप उपस्थपरराजानं प्रपादयतीत्येवमुदाहार्य अत्रा
पि पूर्वं प्राकृता हविरालंभनात्मालंभोदकालंभाः पश्चाद्वैकृतं सो
मप्रपादनादि तथापि च यत्र पारिपकात् प्रागिडाभक्षणा
मार्जनमेव भवति पत्नी दक्षिणादानान्यन्तानि सिद्धानि तत्या

यां च समवनीय पुरोडाशानां निर्वपणाद्दूर्ध्वमाविनः प्रागलंकर
णात् येपदार्थास्तेषां प्राकृप्रचरणी होमादन्त एवानुष्ठानं सि
द्धं अत्र एव पशौ प्राकृतं पूर्वमिति अस्य वाधनाय यदन्तं करो
ति उत्तराधारमाधार्य पशुपुरोडाशं समवनत्तीति अत्र पूर्वमित्य
नेन प्राकृत ध्रुवासमंजनात् पूर्वं पशुसनं विदधातीति तस्मात्
प्राचीनामत व्याख्यानं अप्यक्रमप्रमाणानां विरोधबला
बलं निरूपयते यत्र पाठक्रमार्थक्रमयोर्विरोधो भवति
तथा स्वयं पर्णशाखया वत्सानपाकरोतीत्यस्मात् छिनत्
तीति पाठक्रमः अर्थस्तु अनेनक्रमेणानतिष्ठतीति हा
ति त्रयाववच्छस्थया शाखया वत्सापाकरणं कर्तुं शक्यते व

त्स्वाधाकरणापेक्षच्छेदनमिति तत्र किंपाठक्रमात्क्रमो बल
वत्तानमुतार्थक्रमादितिसंशयेसत्याह विरोधेर्थस्तत्प
रत्वात् पाठक्रमार्थक्रमयोर्विरोधेऽर्थक्रम एव बली
यान् न पाठक्रमः कुतः तत्परत्वात् पाठस्यार्थपर
त्वात् अर्थापर्यत्वात् कार्यसिद्ध्यर्थापर्यत्वादित्यर्थः
तेन पूर्वं छेदनं पश्चात् तया छिन्नपाशाख्यया वत्सापाक
रणमिति अपवत्र श्रुतेः श्रुति पाठक्रमस्य चाविरोधे
भवति तद्यथा सरः स्पितेयस्तेब्राह्मणांतर्पयितवैब्रूयादि
ति श्रुतिः कर्माणि सामान्ये येषां विदध्याति पाठक्रमात्तु स्वि
ष्टकृतः पश्चात्प्राशित्रावदानात्पूर्वमिति तत्र केन क्रमेण

नुष्ठानमिति संशये सत्याह श्रुतीः क्रमादानुमानिकत्वात्
क्रमादिति श्रुतिपाठक्रमाच्छ्रुतिर्बलीयसी तेन श्रुतिप्रती
तक्रमेणोवसा स्विष्टकृत्कर्मणि प्रयोगोच्चारणं न पाठक्रमेणा
कुतः आनुमानिकत्वात्पाठक्रमस्य अर्थात् श्रुतेः प्रत्य
क्षत्वादिति तेयं प्रत्यक्षा हि श्रुतिः सरः स्पितेइति पाठक्रमे
त्वनुमानं अतोऽनेन क्रमेणापदार्था अनुष्ठेयाः यतोऽ
नेनैव क्रमेणापाठ इति दुर्बलं च प्रत्यक्षादनुमानं अतः श्रु
तिक्रमेणेवानुष्ठानमिति सिद्धं एवं तस्मादृशमोग्रहो
गृह्यते तृतीय एव वषट् क्रियते इत्येतदप्यत्रोदाहरणं
अयं किं श्रुतिमंत्रपाठक्रमात्तृतीयस्थाने गृह्यते उतश्रु

का॰य॰सू॰ व्याख्या ३९ ४१

तिवलादृशमइति नववानिवलान्दशमइत्यत्रेति प्राप्ते अप्यच प्र॰ध्या॰खं॰ १

चोदनापाठक्रमस्य मंत्रपाठक्रमस्य च परस्परं विरोधो भवति

यथाज्याधिश्रयणो तोताबाज्यमधिश्रयतीति चेत्याधिश्र

यणं विधाय तदनंतरमेव तत्पुनरुद्वासयत्यूर्जे त्वेति चोदनापाठे

ऽऽज्याधिश्रयणमंत्रानंतरं धर्मोऽसि विश्वायुरित्यादिपत्नीसं

नहनमंत्रांतं मंत्रगणं पठित्वाऽऽज्योद्वासनमंत्र ऊर्जे त्वेति पठि

तः पूर्वाधिकरणेहिक्रमात् श्रुतेः प्रत्यक्ष बलीयस्त्वमु

क्तं अत्रान्ययोः प्रत्यक्षत्वात् किं चोदनापाठक्रमेणाज्योद्वा

सनं कर्त्तव्यं उत मंत्रपाठक्रमेणेति संशये सत्याह मंत्रचोद

नायां मंत्रबलं प्रयोगित्वात् मंत्रचोदनयोरिति मंत्रपाठचो

दनापाठयोर्विरोधे मंत्रबलं मंत्रपाठ एव बलवानित्यर्थः कुतः

प्रयोगित्वात् मंत्राणां मंत्रा हि कर्मकाले प्रयुज्यन्ते पर्यन्ते न चो

दनाः चोदनापाठस्तु विप्रकृष्टः मंत्रस्तु प्रयुज्यमान एवाभिधा

न एवाभिधत्त एवमस्मात्क इति संनिकृष्टः विप्रकृष्टाच्च संनिकृ

ष्टं बलवदिति चेदं प्राप्ते आह न समत्वात् मंत्रपाठ एव बलवानि

तीयदुक्तं तन्न कुतः समत्वात् मंत्रचोदनापाठयोः कथ्यमनयोः पाठ

समता उच्यते मंत्रः कर्मणि क्रियमाणस्य कर्मणः स्मा

रणार्थं प्रयुज्यते चोदनापि कर्मणो विधायिका एवं चोदना स्मृत

याः प्रवृत्तिः एवं यतः पदार्थो विहिते सति पश्चान्नस्मारणा

र्थो मंत्रः प्रयुज्यते अतः सममेवेनादिति प्राप्ते सिद्धांतमाह

गुणानांतुरूपत्वात् तुशब्दःपदःपूर्वनिरासार्थः नेत्तद्गुण
यंसमं किंतुमंत्रपाठएववलवान् कुतः मंत्रेषुगुणानांरू
पत्वात् गुणानांवाहुल्यात् यतोनोदनापाठापेक्षयामंत्रेषु
वहवोगुणाविद्यंते तथाच कर्मकालेउच्चारणंपदार्थस्मा
रकत्वेन यतोमंत्रोऽर्थवादादिकृतव्यवधानरहिताःक्र
मेणापठ्यंते तेनोत्तरमुत्तरंपदार्थंझटितिस्मारयितुंशक्नु
वंति नैवंचोदनापाठः विधेयार्थस्तावकवाक्यभेदभि
वहितत्वेनमंत्रवत्स्मारयितुमशक्तत्वात् नचकर्मकाले
तस्योच्चारणंविहितंमंत्रवत् श्रुतेरपिमंत्राणांगुणा
रूपत्वमाह यस्मादेतद्दाशिराप्यन्तकामित्यादिना यो

हिस्वप्रतिपादितस्यार्थप्रमाणतयार्थंअन्यस्योक्तिंप्रदर्श
यतिसआत्मापेक्षया उत्कृष्टस्येवदर्शयतीनामकृष्टस्य
तेनगुणरूपत्वंमंत्रे शुक्लतोमंत्रपाठएववलवानितिसिद्धं
पदार्थानांक्रमानियमेऽभ्युत्थानादीनितीनिप्रमाणान्युक्तानि
तेषांविरोधेवलावलंचोक्तं अपेदंचिंत्यते यत्रवहूनिप्र
धानानिसहक्रियंते यथादर्शपूर्णमासयोराग्नेयोपांशु
याजाग्नीषोमीयैंद्राग्नादीनि यथाचातुर्मास्यपर्वसु
वाजपेयेऽतिरात्रपशुवशाएषिसप्तदशप्राजापत्येषु
च तत्रअग्रातुउपकारकाणांगानिसर्वेषांतंत्रेणाक्रि
यंते प्रतिवद्धयातिकर्मणांपृथगपद्वावस्तंत्रमित्यत्र तेननते

का॰य॰सू॰ व्याख्या ४१ प्रक्रमचिंता संनिपात्योपकारकाणि तद्द्रव्यसंस्काररूपाणि प्र॰ध्या॰सं॰ ५
41 प्रतिप्रधानं भेदेन कर्त्तव्यानि तत्राचिंत्यते तानि किं एकैकस्य
प्रधानस्य सर्वाणि कृत्वाऽपरस्य कर्त्तव्यानि किंवा समान एकै
कः पदार्थः सर्वेषां कर्त्तव्य इति तत्रैकैकप्रधानक्रमव्यवहितत्वा
त्तिस्थां गान्यपेक्षन्ते तत्रांगानां प्रधानं कालं चरस्य त्यायत्वा
समापयेत् देकैकस्मिन्प्रणकांडमपवर्गः स्यात् इत्यत्राह पदार्थानुसमये
सति सप्रधानादिप्रकृष्येरन् यद्येकस्य सादनं कृत्वा परस्य तदेव क्रि
यते तदा हृदयस्यासादनालंभनयोर्व्यवायः स्यात् सहवचनं
तु क्वारात्रुपकारकसाहित्यमात्रेणापि उपपद्यते तस्मात्कां
डानुसमय एवेति प्राप्ते ह्याह तुल्यसमवाये सामान्यपूर्वमा

नुपूर्व्यं योगात् तुल्यसमवाये तुल्यानां प्रधानानां सह प्रयोगे
द्रव्यसंस्काररूपाणि संनिपत्योपकारकाणां गानि सामान्य
पूर्वं कर्त्तव्यानि पूर्वः पूर्वः पदार्थः सर्वेषां समानः सदृशाः क
र्त्तव्यः तद्यथा बहुषु हविःषु प्रथमं सर्वेषां पात्रीस्थापनं ततः
सर्वेषां तत्र संस्थानिधारः ततः सर्वेषां पात्रीषूपस्तारः ततः स
र्वेषां ग्रहणादानं ततः सर्वेषां कपालांजनं ततः सर्वेषां
कपालोद्वासनं ततः सर्वेषां वेद्यामासादनं ततः सर्वेषां
मालंभः इत्येवं पदानुसमयः कर्त्तव्यः यद्येकैकस्मिन्नुण
कांडमपवृज्येत तथा सति क्रमेण प्रयोगात्प्रयोगवाक्या
वगतस्य साहित्यबाधः स्यात् नहि वचनेनावि प्रोक्षा — सा

का॰य॰सू॰ हित्यमवगम्यमानं कास्मेनिकेन प्रधानात्तत्तिमात्रे गार्हपत्यका प्र॰अ॰ख॰
व्याख्या रकविषयमानं कल्पयितुं शक्य — तेन तस्मात्पदार्थानुसमय : १
४२ इति : अनुष्ठानयोगात्पदार्थानां तन्त्रं तत्रारोच एवं कि
४२ यमाणो पदार्थो अनुष्ठानयोगात् एकैकमेण प्रयुज्यते तन्त्रं त्रा
यः अन्यथा तर पदार्थकरणान्तरं पूर्वेष्ठा क्रियमाणो
मुक्तानुष्ठानयोगो न स्यात् अयेदं विचार्यते दर्शपूर्ण
मासयोराग्नेयाग्नीषोमीयानिर्वापयोः पदार्थानुसमये
स्थिते किं मो — — मुष्टिनानुसमयः उत चतुर्भिर्मुष्टिभि
रिति तत्र यद्येकैको मुष्टिः पृथक्पृथक्पदार्थः तत एकैके
नानुसमयः अथ चतुर्मुष्टिनिर्वाप एकः पदार्थः ततश्चतु

र्मुष्टिभिरिति एवं कपालोपधाने किमेकेना — — कपालेना
नुसमयः उताष्टाभिरेकादशभिश्चेति तथाधिरव
घाते त्रिर्दृषदि सामन्तक्रैस्त्रिरुत्तरमिति वपने च दाक्षिणोत्तरगो
दाने पावने च त्रिः पावयतीति किं प्राप्तं एकैकमुष्टिनो
ति कुतः एकमुष्टिनिर्वापो ह्येकः पदार्थः न च चतुर्मुष्टि
निर्वापः कथं एकस्मिन्मुष्टौ निरुप्ते प्रयत्नः पर्यवसि
तो भवतीति तेन शक्यं वदितुं किंचिन्निरुप्तमिति न च ति
रुप्ते निर्वापो न कृतः स्यात् न च मुष्टिमात्रेणानिरुप्तेन न
प्रयोजनं न ह्येकस्मिन्नानिरुप्ते चत्वारः संभवन्ति मुष्टिस
मानाधिकरणो हि चतुःशब्दः तस्मान्मुष्टिनानुस

मयः कार्यः एवं कपालान्युपदधाति तत्राप्येकैककपालेनानु
समयः कार्यः एकैकेनावदाने सर्वाण्याज्यस्रुवणीयादौ तत्र
द्व्यंजवे एकैककर्माण्यानेनापवनमनेकयजमानकेष्वेकैकगोदा
नसंस्करणेन पावने चानेकयजमानकत्वे एकैकवारप
वनेनेति तदुक्तं जैमिनिना अष्टिकपालस्त्ववदानवत्र्यं
जनवपनपावनेषु चैकैकेन इति ॐ आह नैककर्मणि सं एवं प्राप्ते
बंधात् एककर्मणि एकस्मिन्निर्वापकपालोपधानादि
रूपे कर्मणि पदार्थे तदवयवेन एकैकमुष्टिना एकैककपा
लोपधानरूपेणाऽनुसमयो न भवति किंच चतुर्मुष्टिभिः
त्वष्टाभिरेकादशभिश्च कपालैः न ह्येकैकोमुष्टिः पृथक्

पृथगित्यर्थः किंतर्हि चतुर्भिर्मुष्टिभिर्निर्वापएकः पदार्थः
कृतः संबंधात् चतुःशब्दस्य मुष्टीनां चानिर्वापसंबंधात्
एवं च सहकर्मणाऽनेकगुणविधानं न्याय्यं इतरथा चतु :
संख्यायां मुष्टिसंबंधे मुष्टीनां च निर्वापसंबंधे सति विरूप
त्वद्गुणो वाक्यभेदः प्रसज्येत् अनिर्वापांगं च संख्या स्यात्
विरूपं चैव चतुरो मुष्टीन् निर्वपतीत्यत्र निर्वापं प्रातिमु
ष्टीनामुपादेयत्वं विधेयत्वं अंगत्वं चेति त्रिकसंख्याप्रातिच
तेषां उद्देश्यत्वं अनुवाद्यत्वं प्रधानत्वं चेति एतत्परस्पर
विरुद्धत्रिकद्वयं मुष्टीनामापद्यते तस्मात्संख्यायां मुष्टी
नां चोभयोर्निर्वपतिनैवसंबंधः येचत्वारस्तोमुष्टयः ये

हृष्यन्ते चत्वारः इति परस्परं व्यवच्छेद्यव्यवच्छेदकभावो कथ
य नान्यायेन द्रव्यस्य गुणावच्छेदकत्वेन गुणस्य च द्रव्याव
च्छेदकत्वेनार्थो भवति न तु वाक्यान्तेन वाक्यभेदो न भवति
तस्माच्चतुर्मुष्टि निर्वाप एकः पदार्थः अंगपर्यायो हि प
दार्थशब्दस्तेन पयोः प्रधानयोः सहानुष्ठानं तयोर्यदंग
तदेकस्य कृत्वा परस्य कर्तव्यं चतुरो मुष्टीन्निर्वपतीति
शास्त्राच्चतुर्मुष्टिनिर्वापोऽङ्गं स च पदार्थः तदवयवश्चैको मुष्टि
न पदार्थः न चावयवेनानुसमयः किं तर्हि पदार्थेन एवं क
पालोपधानादिष्वपि अष्टाकपालमेकादशाकपालं नि
र्वपतीति निर्दिष्टानां तावतामुपधानमेकैकः पदार्थः द्विर

वपतीति त्रिरभ्यंक्ते दार्भेण तरुणेनोदनं वपने त्रिः पावयतीति च
एवं च संख्यादीनां क्रियांगत्वं च भवति तस्मात्समुदायेना
नुसमय इति सिद्धं एवं सर्वत्र पदार्थानुसमये प्राप्ते काचित्तम
दपवादं कांडानुसमयमाह ग्रहणसादनावदानप्रदानेषु
तु वचनात् सोमे ग्रहणानां ग्रहणे एकैकस्य ग्रहस्य ग्रहणं
सादनान्तं कर्तव्यं अनेकहविष्कोच्चावदानं प्रदानान्तं कर्त
व्यं वचनात् वचनं ऐंद्रवायवादीनां सादनान्तं पठित्वा र
अपान्तो ग्रहः शुक्रान्त्ये वायवा मित्रावरुणेति त्रिस्त्रयप्यसर्पितं ग
शुक्रान्त्याद्विकं बृहच्छन्दसि द्वादशाहे ग्रहव्यूहे तं गृहीत्वा
न सादयतीत्यस्य सादनप्राप्तिवेधाप्राप्यत्र ग्रहणानन्तरं

तत्कालमेवसादनंबोधयति यत्रप्रधानादिषुयागेष्वनेकहविष्के
ष्ववदानस्यप्रदानांतंतत्रसर्वेषुप्रधानयागेषुपृथक्पृथक्क्रि
यते तथाचोदिविशेषार्थः एवंसर्वत्रावदानेप्रदानांतेप्राप्ते
आह नद्रव्यभेदेगुणाभ्योगादितिवात्तस्य : वाक्यपद्येथिरि
त्याह द्रव्याणांपुरोडाशचरुसान्नाय्यपश्वादीनांभेदेप्र
पचभावेनानात्वेवहुत्वेसत्यपिदेवताचेत्समानाभवतिया
मुद्दिश्यतानित्यज्यंतेनाहिंतत्रावदानप्रदानांतंनभवति
किंतुसर्वाणिक्रमेणावदायसाहित्येनप्रदानंकार्यमित्य
र्थः कुतः गुणाभ्योगात् द्रव्याणांयागंप्रतिगुणत्वेनसंयो
गात् अंगत्वेनसंबंधात् प्रधानंहियागः द्रव्याणिचांग

भूतानि तत्रयागस्यैकत्वात्येनसाहित्यंतत्रतावदवदा
नंप्रदानान्तंक्रियतेतर्हिगुणानुरोधेनप्रधानावृत्तिःकृताभ
वतिनचासाविष्यते तस्मात्तत्रावदानंप्रदानान्तंनकर्त्त
व्यं किंतुसर्वाण्यवदायसहप्रदेयानि तद्यथा दर्शेष्टौद
धिपयसोर्यागे सर्वत्रास्विष्टकृद्यागेचानेकहविष्के सन्न
दशारब्धाज्यापत्येष्टुच स्वयेदंविचार्यते किंदर्शपूर्णमा
सचातुर्मास्यपश्वादिकेष्वारब्धेऽपरिसमाप्तेचसतीति
यत्तस्यानियतकालस्याग्निहोत्रापित्र्यपशादेःकालेप्राप्ते
नैसतीतिकिंतन्मध्यएवतत्कर्तव्यं उत्तत्रकर्तव्यमिति
यद्यपिचात्राग्निहोत्रप्रयोगयोःप्रारब्धकर्मणिहोत्रयानि

मिथ: क्रमोगं तथ्याविसायंकाले हृयो: संनिपाते तयोरवश्यंभा
विनि क्रमे प्रारब्धं समाप्य अग्निहोत्रं हूयमाने तस्य स्वकालाति
पत्ति प्रसंगः स्यात् किं कुर्यामिति चिंत्यते तत्रेष्टिपश्वादिकं च
स्वकालादुत्पन्नमेव तस्यांशमध्यपाते न कश्चिद्विशेष:
अग्निहोत्रस्य तु तस्मिन्काले क्रियमाणस्य उद्धरणलोप:
स्यादुत्कर्षेन काललोप: तत्रैकस्यानुग्रह: कस्य लोप इति
चिंत्यते तत्रोद्धरणानुग्रहे सति प्रयोगावधारणोत्तरं
कालप्राप्ते: कालस्य जघन्यत्वेन बाध: प्राप्नोति किंच
पूर्वस्य व्यवधानं च स्यात् मध्ये क्रियमाणे तस्मात्का
लबाध इति प्राप्ते आह प्रवृत्ते नियतं दोषाविशेषात्

प्रवृत्ते प्रारब्धे इष्टिपश्वादिके कर्मणि नियतस्य काले आग
तेति यत्नं नियतकालीनं अग्निहोत्रपितृयज्ञादिकं तन्मध्य
एव कर्तव्यं कालस्यानुपादेयत्वेन निमित्तत्वात् तस्मिं
प्राप्ते अग्निहोत्रं उद्धरणं मनाहृत्यापि कर्तव्यं कुत: दो
षाविशेषात् यतो नित्यस्याकरणे दोषो भवति ननु
पूर्वस्य कर्मणो व्यवधानेपि दोषोस्त्येव सत्यं अक्रिय
माणेनु विशेषेण यतो नित्यकर्मणा: प्रधानस्याक्रि
यात् क्रियमाणेपुनरंगभूतानां पदार्थानां व्यवधान
मात्र ननु कस्यचन लोप: अत एवोक्तं दोषाविशेषादिति
अपि वा संबंधेन व्यवधानेपि न दोष: तस्मान्नियतकाल

का॰ व॰ सू॰
व्याख्या
४७
47

प्र॰ धा॰
१

लीनं कर्ममध्येपि कर्त्तव्यं अथेदं विचार्यते ज्योतिष्टोमे षो॰
डशिनं प्रकृत्याम्नायानन्तरं पराञ्चमुक्थ्येभ्यो विष्टुत्लातीति तथे
दमपरं श्रूयते तं विष्णुस्तत्मयाहुवाकरोत्परस्तात्सितेनत्र शाउं सती
ति शास्त्रांतरे च सम्याधस्वपिते षोडशिनः स्तोत्रं स्वमुपकरोती
ति एवं सति यदि देवाद्द्रुरूप्यतामुत्कर्षः स्यात् तदा किं षोडशि
नो न्हाप्युत्तेउक्थ्येभ्यः पूर्वमपि प्रागस्तमयात्षोडशिनउपाकर
णं कर्त्तव्यं अथवोक्थान्त्केषैसति षोडश्यप्युत्कृष्यते उक्थ्य
विग्रहेभ्यः पर एव भवतीति तत्र पूर्वाधिकरणोक्तन्याये
नानियतकालत्वांगानां तत्तोक्तमप्युत्कृष्येत तत्रग्उरास्त
मयादितिविहितः कालोवाध्येत नन्वनुत्कर्षपक्षेप्युपारि

परिभावो वाध्येत वाध्यतां क्रममात्रं हि तत्कालस्तु वलीयानि॰
त्युक्तं तस्मादनुत्कर्षं इति नानाग्रहहीत्याचम संचोनीयस्तोत्र
मुपाकुर्यादिति वचनान्नदंश इति प्राप्ते अ्राह षोडशीनित्या
नुपूर्वमस्यपरस्तात् तथाद्धः पूर्वाधिकरणसिद्धांताद्वेदे षो
डशीतिभक्तानुत्कर्षो न भवति किंतूत्कर्षमेव कृतःस्मानु
पूर्व्यस्यपरस्तात् अत्रानुपूर्व्यस्य क्रमस्यपरस्तात् महत्वा
द्बलवत्त्वादित्यर्थः कथं तं परां चमुक्थ्येभ्य इतिवचना
त् षोडशिग्रहणस्यासस्योक्थ्येभ्य उपरिभावोगतोस्तु
क्थ्यमारोपधानां गंगाध्येत नचैतद्युक्तं अतो
वरमंगान्तरतोपांगस्यैव कालस्य वाध इत्युत्कर्ष एव षोड

का॰य॰सू॰
व्याख्या
४८
48

प्र॰ष्प॰ख॰
१

श्विनइति सिद्धं । निःसंदिग्धं च स्तोत्रस्य संनिहितग्रहयागांगत्वं त
था चोत्कर्षं पंचमस्य प्रथमपादं त्याधिकरणोक्तं ग्रहत्वेन ग्रहणाक्रमा
नुग्रहार्थं नित्कर्षो विधीयते किंतर्हि यागक्रमानुग्रहार्थं त
स्य च स्तोत्रं प्रति प्राधान्यम विवादं अतस्तस्य यागाभ्यासस्य
काले तांगस्य स्तोत्रस्य च लोवाध्यते इति युक्त एवोत्कर्षः किं
च तस्तुत्कर्षे षोडशिनो विकृत्या उक्थ्यविग्रहाणां च उक्थ्
षैल्बिकस्य षोडशिन इति अतोपि उत्कर्ष एव इदानीमिदं
चिंत्यते यथैव स्वाध्यायावीहिते पाठक्रमार्थ वचनात् यागो
क्तानिष्टादिषु क्रमानियमः नथ्या कल्परखेष्वपि तद्वाक्यानाम
पिहि विहितक्रममेवाध्ययनं स्वाध्यायविधिना विधीयते

तस्य च प्रयोजनांतरं नास्त्यतः क्रमानुष्ठानात् तस्मात्कृत्यं तत्र ग
मयीष्टिपशुसर्वसोमयागादीनां पाठक्रमेणानुष्ठानमिति पूर्वः
पक्षः सिद्धांतमाह अनियमः फलसंयुक्तेषु फलसंयुक्तेषु प्र
धानकर्मसु इष्टिपशुसोमयागाद्यात्मकेषु अनुष्ठाने अनिय
मः क्रमनियमो नास्ति तत्र काम्येषु तावत् न क्रमनियमः अ
नियमेन हि कामा उत्पद्यंते तेषां नास्ति क्रमः नाहित्येवावक्र च
मेणानियतेश्रावयंते वक्तृकामाभावस्यानीरंकुशत्वात् अतोऽनि
यतक्रमाः काम्याः कर्मणामप्यानियमत्वात्तीनिपादयंतीति फले
नपाठक्रमस्य वाधः अपिच तानूनामनंगत्वादेकप्रयोगा

कात्य॰सू॰ व्याख्या ४८ ५१

क्वचनाभावाच्चनास्तिक्रमः यदिचक्रत्ववः परस्परस्यांगंभवेयुः प प्र॰ध्या॰सं॰
दिवासर्वदर्ते ऽन्यस्यकस्यचित्समिदादिवदंगं स्युः यदिवात्र १
तन्त्रप्रयंगत्वेस्त्राणेयादिवदेक प्रयोगवचन परिग्रहीताः स्यु
स्तंसर्वेषांसहानुष्ठानं बोध्यप्रयोगविधिः क्रमानियमम
न्यत्रोपदेशमाराः पाठक्रमकत्वेनग्रहीयात् तत्वेनदृत्ति निया
नचपाठः स्वयमेवक्रमस्यविधायकं स्वाध्यायविधिरवि
यत्येनश्रावयतेकर्तृतत्रत्रैवनियुक्ते पाठक्रमस्यप्रयोगव
चनाकांक्षितक्रमनियममात्रेशक्नोति दर्शनिक्रमाविधातुं
तस्मादत्रप्रयोगवचनपरिग्रहीतानां नपाठतः क्रमनिय
मइतिसिद्धं नहिपाठक्रमः किमर्थइत्यतआह क्रमोविध्यर्थः

कर्मरायसंभवात् क्रमोविध्यर्थः विध्यनार्थोजपपारायणा
ध्यापनादिमन्त्रेनैव क्रमेणपठनार्थः नानुष्ठानार्थः कु
तः सर्वस्यारात्परेकमणिमसंभवात् पाठक्रमेणानुष्ठाना
संभवात् यतः सर्वस्यापोमरणाकामस्यविहितः यदिपाठक्र
मेणानुष्ठीयंतेतर्हिसर्वस्यारेणामरणोसिद्धेसतिकथ्यं ततउ
द्धंकर्मारिणाकर्तृशक्यंते तस्मात् क्रत्वनुष्ठाने क्रमनियमो
नभवतीतिसिद्धं इदानीमिदंविचार्यते किंभवत्तस्योद्
तस्यघृवदानमात्रस्यनाशेहविरंतरमुत्पाद्यं उततस्मा
देवहविःशेषात्पुनरवदेयमिति तत्रस्त्रैणेवप्रथमं

सिद्धान्तमाह ५ अवत्तनाशेन्यद्गुणानुग्रहात् अवत्तस्य पुरो
डाशाद्यवयवैः सकाशात्पृथक्कृतस्यावदानद्वयमात्रस्य
नाशे अन्यद्धविरुत्पादनीयं यागार्थं कुतः गुणानुग्रहा
त् एवं कृते मध्यपूर्वार्द्धविहितरूपे गुणोनागेन साध
नभूतेन यागोनुगृहीतो भवति कृतो भवति यदि पूर्वह
विःशेषादेव पुनरवदाय यागः क्रियेत तदा तस्य मध्यपूर्वार्द्धविक
लत्वाद्विगुण एव यागो भवेत् कथं अवदानस्यैव यागार्थत्वा
त् तेन स्य विनष्टत्वादवशिष्टस्यायागार्थत्वात् समस्तपुरोडा
शस्य यागार्थत्वेपि अवदाननाशे तस्य विकलत्वात् नचा

सौ यागो विगुण इष्यते तस्माद्धविरन्तरमेवोत्पाद्यं उद्धृताव
दाननाश इति प्राप्ते आह न पूर्वशेषात् यदुक्तं अवत्तनाशेऽ
न्यदुत्पादनीयमिति तन्न किन्तु पूर्वशेषात् पूर्वस्यैवावशि
ष्टस्य हविषः शेषात्पुनरवदेयं कुतः विनष्टेपि अवदाने
पुनः मध्यपूर्वार्द्धसंभवात् तावन्मात्रस्य च यागार्थत्वात् पुरो
डाशस्य यो मध्यपूर्वार्द्धावयवौ तदपादानकं तदवयवमात्र
मवदानद्वयं यागसाधनं नष्टे च मध्यपूर्वार्द्धेपि यावद्विनिष्ट पू
र्वं सकलरूपे पुरोडाशे यौ मध्यावयवः पूर्वार्द्धावयवश्चावदा
नादानन्तरं ते एवावदानापेक्षयावयवौ नास्मिन्नवदानो
द्धरणोन विनष्टेपि मध्यान्तरस्य पूर्वार्द्धान्तरस्य चावदानद्वयोप

तद्धारात्वेन विद्यमानत्वात्तत एव पुनरवदेय नन्वकृतस्तस्य मध्य
पूर्वार्द्धेवदेये न विकल्पस्येति चेन्न तद्वकृतत्वेऽपि शाखान्तरे पर्यायत्वात्मध्या
दवद्यतीत्येतावदेव प्रयुज्यते नन्तर्सकस्यासकलस्य पुरोडाश
स्य मध्यादिति तस्मात्पूर्वार्द्धादवदेयमिति अचोदितत्वा
त्र अवत्तमवदानमात्रतायोक्तान्यत्राविरुत्यादनीयमेवं
अचोदितत्वात् कृताप्यविहितत्वात्पूर्वार्धादेवावदेयं
स्विष्टकृदवदानपूर्वार्द्धयोगात् अपि च परोक्षात् अवदीयमाने
द त प्रविः स्विष्टकृद्भवति स्विष्टकृदस्या लीनि स्विष्टकृद्यत् अ
न्यस्मिन्हविषि उत्पादितेन इदं पूर्वहविः स्विष्टकृद्वत्तन भव
तिनहि तदातत स्विष्टकृदर्थमवदानं गृह्यते किंतु तत्तनोत्पा

दितादेव कृतः अत्रानुपूर्वयोगात् यतः स्विष्टकृदवदानस्या
नुपूर्वायोगोऽस्ति प्रधानादवदानानंतरं हि ततः स्विष्टकृदर्थ
मवदानं भवति यदि च प्रधानादवदानमेव पूर्वस्मात् गृह्यते
स्विष्टकृदर्थमपि ततो न गृह्येत ततः पूर्वस्माद्धविष उत्पत्ति
र्व्यार्थ्यवस्यात् शेषात्प्रधानार्थ्यैवदीयमाने स्विष्टकृदर्थम
पि ततो वदीयत एवेति पूर्वहविः स्विष्टकृद्भवतीति पूर्वपक्षे गुरु
राः अत्र प्योक्तमेवासिद्धान्तं [illegible] यति गुरावाहनेऽनिर्दोषाभावा
त् [illegible] गुरावाहनाविति गुरवास्य यागं प्रति गु
रावुत्तस्य यागसाधनत्वात् तस्य च अवदानस्य हानिर्गुरावाहानिः
हविषो मध्यपूर्वभागस्य यागं प्रति गुरावुक्तस्य यागसाधन

52

भूतस्य हानेरसत्यां नाशे सति न पूर्वशेषादवदेयं कुतः शेषभा
वात् शेषत्वादेव तस्यावशिष्टस्याशेषकार्यत्वादित्य
र्थः कृत्स्नस्यापि पुरोडाशस्य यो मध्यदेशस्तदपादानको
यस्तस्योपरि तनांगुष्ठपर्वमात्रोऽवयवः सोऽवदातव्यः अ
न्यस्त्ववदेयस्यापादानभूतः न त्वसाववदातव्यः स त्वि
डादिशेषकार्यार्थो न प्रधानयागार्थः अतो नाशो हविः
प्रकृतहविस्तादृशत्वं नाद्विनाशे च हविरन्तरमेवोत्पाद्यं यद्य
वशिष्टावदानस्यैव यागार्थत्वात् तत्कृताद्विनाशे शेषस्य यागार्थ
त्वाभावात् द्रव्यान्तरं यागार्थमुत्पाद्यं यदापि समस्तपु
रोडाशसाध्यो यागस्तदापि अवदाननाशे तस्याविकलत्वा

दविकलं हविरन्तरमुत्पाद्यं तस्मात्साधूक्तमवदाननाशेऽन्यदिति
तदुक्तं संस्कारकाण्डे पुरोडाशेऽवदानं प्रयाजकं नाद्विना
शाच्च न व्यासेनावदेयमतस्ततः गृहीतौ मध्यपूर्वार्द्धौ तौ च
नष्टावुभावपि अतः शेषस्य शेषत्वात् प्रधानत्वं न युज्यते
इति अथेदं चिन्त्यते इन्द्राग्निसोमादिदेवतानां क्वाहवनी
वनीयादीनामग्नीनां मन्त्राणामृचेत्यादीनां क्रियाणां
च दृष्टार्थानां प्रयाजशेषाभिघारणादीनामन्तरस्मरणादीनां च प्रति
चारे किं देवतान्तरमन्यन्तरं प्राद्यान्तरं च प्रतिनिधेय
मुत नेति पूर्वेणान्यायेन प्रतिनिधौ प्राप्ते सूत्रकार आह न देव
ताग्निशब्दक्रियाः पदार्थत्वात् देवताग्न्यादिको

का॰य॰सू॰ व्याख्या ५३ त्रेताग्नयस्त्राहवनीयादयः शब्दोमंत्रः क्रियाश्चोद्धरणप्रयाजादि प्र॰ध्या॰ १
53 काम्यदृष्टार्थो दृष्टार्थैस्तुत्ववघातादिष्वस्त्येवप्रतिनिधिः
नखैर्निर्लुंछनादिभिरपितत्कार्यसिद्धेः तदेतेषांदेवतादी
नामस्मरणादिनापचारेप्रतिनिधिर्नभवतिकुतः परार्थ
त्वात् अदृष्टार्थत्वादित्यर्थः प्रतिनियतानिह्येषामद
ष्टानि तथाहि यत्राहि प्रतिनिधीयमानंमुख्यस्यकार्यंसा
धयतितत्रप्रतिनिधिः नाविहतप्रयोगंभवति कथंदेवता ये
ग्निशब्दः क्रियाः प्रतिनिधत्तेसकामंत्तेच्छयादेवतामपिप्रतिनि
दध्यात् अकामात्तुमंत्रोकामभिन्त्यंनरः आग्नेयाद्रक्रियाया
मप्रतिनिधेयत्वस्यदृढीकरणार्थमिदंसूत्रं यत्रोदेवतायाः

प्रतिनिधिः सर्वार्थानसंभवति नहिऐंद्रहविष्यग्निर्देवताभ
वति नहिजात्याकाचिद्देवतास्ति वैदिकेकर्मणि यायत्रं
विधीयतेसातत्रदेवता तेनान्यत्रान्यादेवतैवनभवति
अविहितत्वात् प्रतिषिद्धप्रत्यवायात् नेत्यनुवर्तते
यत्पूर्वकोद्रवमाषवरकादिप्रतिषिद्धंतत्प्रतिनिधेयं क
प्रत्य तःवायात् यतःप्रति[illegible]धातौप्रत्वेवायोभवति तथाहिश्रु कस्मे
यद्द्रिपाविकोद्रवाक्ष्यज्ञियावैवरटकाः अयज्ञियावैमाषाइति
प्राप्तिप्रतिषिद्धपक्वसाधनभावामाषादयः अतोनमाषादी
नांप्रतिनिधित्वं तदुक्तं व्रीहिर्यवोवाप्रयामाकोनीवारोवाह
विर्भवति वैराज्यवामहत्स्वंवाशाकमूलंफलंजलं सर्वंवाह

का॰य॰सू॰
व्याख्या॰
५४

विरेत्तेषु यथासंभवमाचरेत् यथा व्रीहियवाभावेऽपि तंडुलयो
गिनीः ईषधीः परिगृह्णीयादरण्यकोद्रववर्जिताः ग्राम्याणां वा
भावेऽप्याम्यंत्वरण्यानां मरण्यजं यवाभावे गोधूमादयस्ततो वे
णुयवादय इति अथेदं विचार्यते प्रोषिते कार्यांतरव्यापृतेवा
यजमाने तत्स्थाने किं याजमानपदार्थकरणं पत्न्युत ब्रह्मप्र
तिनिधेय ऋत्विजेति तत्र व्रीह्यपचार इव प्रतिनिधौ प्राप्ते आ
ह स्वामीफलयोगात् नेत्यनुवर्त्तते स्वामी यजमानो न प्रति
निधेयः यतस्य कर्त्तुः फलं सिध्यति यादृशः प्रतिनिहितो
यद्विगुणादानं द्रव्यत्यागं च करोति तदा तस्य सम्यक्फलसं
बंधानस्त्वयमेव स्यात् प्रतिनिधिः पत्नीनस्वतंत्रा अतना
स्वामी ४ पं॰ १॰

प्र॰ ध्या॰ खं॰
१

ष्यन्ते पत्न्यो ऋत्विगंतरं प्रतिनिधयः प्रयोद्यतीत्यनौपांकत्वीय
मेव प्रोषिते अन्यत्र व्यापृते वा यजमाने यत्नावत्त्रकृत्यर्थो ग्र
ज्यावेद्गणादयः तेषु यथासंख्यमध्वर्य्वादय एव कर्त्तारो विधं
ते इति न प्रतिनिधिनः कार्यं ऋत्विजां स्वकारणाणां च प्राक्विवरणादी
नां कार्यत्वात् विना यजमानेन नास्ति विगुणत्वं पत्न्या अ
पि तत्स्थानसंभवात् यानि च ब्रह्मचर्यादीनि फलं प्राप्तियोग्य
तायाः कारणानि तानि बहिरवस्थितेनापि यजमानेन क्रियमा
णानि क्रत्वोपकारकाण्येव तस्माद्देवंधाद्वेशावेदनाद्व
ध्वर्य्वादिविद्यमानत्वात् इतरवत्प्रत्यर्थासंभवात् प्रतिनिधेरनु
पपत्तेः यजमानप्रतिनिधिः कृतः फलयोगात् नाप्यृत्विजांतरे

का॰य॰सू॰ व्याख्या ५५ त्वाक्रियमाणानि ब्रह्मचर्यादीनि यजमानस्य फलयोग्यतां संपा प्र॰ध्या॰ १
दयंतीत्यसंभवः प्रतिनिधेः तस्मात्प्रवासादिना पत्न्यादेरसा
न्निध्ये तस्या नेयास्यंतरं प्रतिनिधेयमिति ननु पत्न्याम्सन्ना
यां किमग्निप्रतिनिधिरुत नेति नायमस्याधिकरणस्य वि
षयः तत्रापि हि यदा ना बह्वार्थये पूर्वमारण्यैर्दत्वाग्नीनं
स्य कर्मणि तस्य यंपन्नः समाश्रीयते तदाप्यभावादेवाग्न्य
धिकारः सिद्धः यदा तु नागतयः पत्न्यो दत्तास्तदाप्याचार
प्रमाणाया अपत्नीकस्य दर्शपूर्णमासाद्यनुष्ठानं अग्नि
होत्रमात्रं तु वचनादनुष्ठीयते तदापि पत्नीकोप्यग्नि
माहरेदिति वचनान्नास्ति पत्न्याः प्रतिनिधिरिति तंत्ररत्ने

गुरोरेषु प्रतिनिधिः परार्थत्वात् गुरोः क्रत्वर्थेषु गुण
पदार्थेषु पात्रासादनागत्यन्वाधानवेदबंधनादिषु स्वामि
नोपि प्रतिनिधिर्भवति यथा समास्य मध्वर्यादिरेव तत्र लभ्य
नीत्यर्थः कुतः परार्थत्वात् पात्रासादनादीनां क्रत्वर्थ
त्वात् क्रत्वर्थानि ह्येवमादीनि नवपनादिवद्यजमानसं
स्कारार्थानि अतः परार्थत्वादेवमादिषु क्रत्वर्थेषु स्वामिनोपि
प्रतिनिधिर्भवति अथेदं विचार्यते सप्तदशावराद्यत्वविंशति
परमाः सत्रमासीरन्निति तत्र सप्तदशप्रभृतिषु सत्रमाराय
गाद्यर्थं प्रवृत्तेषु यदा कश्चिन्म्रियते तदा तत्स्थानेऽन्यः प्रति
निधेय उत नेति तत्र षष्ठीविधिकरणन्यायेन स्वामिनः प्रति

का॰य॰सू॰ व्याख्या ५६ निधिर्न भवतीति प्राप्तेऽत्राह सत्रेषु तु प्रकृतेः तुशब्दः पूर्वाधिक प्र॰ध्या॰ १
रणासिद्ध्यर्थं नादृदमाह सत्रेषु त्याप्यपि प्रतिनिधीयते यज
मानस्यापि प्रतिनिधिर्भवति कुतः प्रकृतेः अथ यदि
56 संदीक्षितानां प्रमीयेत तस्य योनेदिष्ठी स्यात्तमुपदीक्षयेत्
नमह पतेरात्रेति श्रवणात् काम्यमपि यत्प्रारब्धं तद्वश्यं
समापनीयमित्युक्तं आवश्यकत्वाद्बहुयजमानप्रयो
क्तव्यं अत्रापि पयेयजमानास्ते इत्यादि रतीयजमानश त्र=
ब्दस्य स्वामिनि तकर्तृवचनत्वात् एकशब्दोपात्तायाश्च स्वा
मिकर्तृत्वयोरात्विज्याद्देशेनाबाधितसंभवात्स्वामिभिरेवार्त्वि
ज्यं कर्तव्यं स्वामिगताहि सप्तदशादिसंख्यातत्राङ्गं तथा ता

चविगुणायं मतस्तत्संपादनाय भुक्तं प्रान्तरं प्रतिनिधेयं (ननु स्वा
मिगता सप्तदशादिसंख्या नृत्वानीतः स्वामी कथं यो ह्यारभ्य
समापयति तस्य सकलकर्तुः फलं भवति स च स्वामीत्युच्यते)
अथेदं विचार्यते सत्रयो यं प्रतिनिहितः स फलयोग्यता हेतवो
वनाध्यं अनाद्यजनादयो यजमानधर्मा न भवन्ति उत भवन्तीति
तत्र स्वामिधर्माणां फलप्रतिग्रहणायोग्यत्वापादकत्वात् प्रतिनि
धेश्च फलप्रतिग्रहाभावात्स्वामिधर्मा न भवन्तीति प्राप्तेऽत्राह स
त्रधर्माः कर्मयोगात् सत्रेषु प्रतिनिहितो नेदिष्ठी तद्धर्मा स्वामि
धर्मा भवति स्वामिनो धर्माः संस्कारा वपनादयस्तस्य भवन्ती
त्यर्थः कुतः कर्मयोगात् स्वामिकर्मणाहि त्यागादिना सम्प्र

युज्यते अतस्तत्संस्कारसंस्कृतेनैव तत्कर्मानुष्ठानं युक्तं यद्यपि
स्य फलाभावात्फलिनः संस्कारान प्राप्नुवंति तथाप्यस्मिन्सं
स्कृते सत्यन्येषां यत्सप्तदशत्वं तत्संस्कृतेषु सप्तदशत्वं प्राकृतस्थि
तं भवति ततः सप्तदशाऽवरा सत्रमासीरन्नित्येतच्छास्त्रमनु
गृहीतं भवति अन्यथा संस्कृताः षोडशैवेति शास्त्रं बाध्येत
यदि बहूनां यजमानानामभावेऽल्पसंख्या यजमानाः
स्युस्तदापि सप्तदशाः पेक्षिताः तत्र तेऽप्यल्पसंख्या इत्यर्थः
अतएव तत्संख्या फलप्राप्तेर्यद्यपि काम्यकर्मानुष्ठानं साध्यता
स्य सप्तदशाकर्तृकत्वं ब्रह्मचर्यादेः स्वकार्यं नासिद्ध्येत् तस्मा
त्स्वामिधर्मा निर्दिष्टा इति सिद्धं अस्यैवं विचार्यते सत्रेषु किं

त्रयाणामपि वर्णानामधिकारः उत ब्राह्मणानामिति तदर्थं च किं
ये यजमानास्ते ऋत्विज इति अनेनार्त्विज्यं यजमानसंस्कारत्वेन
विधीयते उत यजमानानामार्त्विज्यं गम्यते नेति तत्र समृद्धिकामा
दिवाक्येषु विशेषाश्रवणात्त्रिष्ववर्णेषु प्राप्तेषु यच्छब्देन तानु
द्दिश्य तेषां संस्कारार्थमार्त्विज्यमुच्यते ये यजमानास्त ऋत्विज इ
ति अत्र यजमानार्त्विक्शब्दयोः एकार्थत्वेनाभिधेययोः सामा
नाधिकरण्यमनुपपन्नमेकेन लक्षणार्थेन भवितव्यं तत्राप्य
ल्पत्वाद्यजमानशब्दः ऋत्विक्शब्दः जघन्यत्वाद्वात्तिकशब्दो
लक्षणार्थः यो हि पराधिकृतो यजत्यध्वर्य्वादिः स तस्य याजक
मार्त्विक्पदमामनन्ति वाक्ये तस्य स्वामिवचनेन यजमानपदेन

का॰य॰सू॰ व्याख्या ५८ श्र॰धा॰ १

68

रव्यसामानाधिकरण्यासंभवात् कार्यलक्षणाभवति ये२
परिक्रीतकर्तृकत्वेन प्रकान्ताः प्राशापदार्थास्ते ऋत्विजो यज
मानाः कर्तारः स्युरिति न चैवमन्त्यविकर्तृकत्वं प्रा
कनीयं यजमानामेकमेकं कर्तृत्वाभ्युपगमात्विक्कोपपत्ते:
नहि वरणाभरणाजन्यप्रमहस्पतित्विक् प्रामनमनावृत्तिव
रणाभरणायोः अहत्यापलिमस्त्यन्यावरणवत्सम
वेपि वरणाभरणो कर्तव्ये स्यातां तस्मात्वरणाभरणानिमि
त्तमृत्विक्त्वं किंतु ऋत्विक्त्वं यजनानिमित्तं अतः सर्वोप्यसंस्यास्तोर
अस्ताधिपाशाप्ताध्वर्यवादयः संस्येय। तेन यजमाना एव ना
ये वचनेनाहि परकर्तृकत्वेन पदार्थानां यजमानकर्तृकत्व
प्राशानां

४ सत्राणि ब्राह्मणानामेव [illegible]
[illegible] ४०.१.

विधीयते यथाक्ताभक्ष्योपस्थाकृतस्ववेशाप्रातीनानिर्देशकोहतीत्युः
तेको वा काय इति विचिंत्यते तत्र सर्ववर्णानां यजमानानामुद्दिष्टप्राति
निर्दिष्टानां ऋत्विज्यं संस्यात्तेन विधीयते प्रधानत्वे द्वेयंभवातीय
षत्वयुक्ता ऋयजमाना उद्दिष्टाः इतिते प्रामेव प्रधान्यात्तेन यथा ब्रा
ह्मणानां यजमानानामेव सत्रां वचनप्रामाण्यादार्त्विज्यं एवमित्त
रयोरपि वर्णयोः प्रधानभूतेरवयजमाने: क्रियमाणमार्त्वि
ज्यं न गुणभूतात्कर्तनपेक्षते गुणकर्तृ परिछेदेनबाह्मणाय
मार्त्विज्यं तदभावेतदपि ब्राह्मणाभावात्नसत्रे प्राप्नोति तस्मा
त्रयाणामप्यधिकार इति पूर्वः पक्षः सिद्धांतमाह सत्राणि ब्रा
ह्मणानामार्त्विज्यश्रुतेः ये यजमानास्त ऋत्विज इति श्रवणात्

का॰ य॰ सू॰ व्याख्या ५६ यद्यप्यत्र सर्वै वर्णा ऽऽदिष्टा प्रतिनिर्दिष्टाः विशेषप्रकरणात् तथाप्य प्र॰ ८ अ॰ १
त्विक्त्वं यजमानानां संस्कारत्वेनैव विधीयते तथा सत्यार्त्विज्यस्य
प्राकृतकार्यप्रसंगात् तेन यच्छब्दप्रयोगेप्यत्र न यजमाना ऽऽदि ऽदि
श्यंते किंत्वार्त्विज्यादेन तत्कार्त्स्न्ये कामदार्थेनोद्दिष्टयजमानाः
59 कर्तृत्वेन विधीयंते प्रत्याम्नानत्वात् ऋत्विजो निवर्तंते आर्त्विज्यं
एवं प्रधानं तस्य चोद्धो धर्मो ऽङ्गत्वेन प्रकृतितः प्राप्तेस्तत्रा
कर्तृकत्वाब्राह्मणकर्तृकत्वाच्च तत्रान्यकर्तृकत्वाये यजमाना
नामृत्विक्त्वमनेन बाधितं ब्राह्मणकर्तृकत्वाय स्तु नाकिंचिद्वा
धकमस्ति ऋत्विक्प्रादिशब्दानां ब्राह्मणाविरोधात्तस्मा
त्प्रकृतितः प्राप्तं ब्राह्मणकर्तृकत्वं बाधानिकं च यजमानस्य

कर्तृकत्वं प्रयं संपादयितुं ब्राह्मणानामेव सत्राणि भवंतीति ॥
सू॰ आप्येदमपरं चिंत्यते प्रयाजेष्विष्टकृदर्थे वानुष्ठानेयिष्टौ बो
राजन्यवैश्योष्ट्रादीनां नाराशंसो द्वितीयः प्रयाजस्तद्वत्तया
दन्येषां तत्र वसिष्ठात्रिवध्र्यश्वशुनककण्वकश्यपसंकृतिगोत्रे
ष्वन्यात्तनूनपात्प्रवरवंतो वा नराशंसप्रयाजवंतः इतरे च तनूनपात्प्र
याजवंतः तत्रैतेभिन्नकल्पा अपि मिलित्वा सत्रं दशाद्यवराः संह
त्य सत्रोपयिकादीनामनुवृत्ते उत तस्मान कल्प एवेति तदर्थमिदं वी
चार्यते किं वासिष्ठादयो नाराशंसायंगात्प्रकर्तारो विधीयंते उत व
सिष्ठादीनुद्दिश्य नाराशंसादि तादर्थ्येन विधीयत इति तत्र वा
सिष्ठाद्यर्थत्वे नाविधानेकल्पकल्पनात् कारणाबाधात्तु वासिष्ठा

का॰ व॰ स्॰
प्रारवा
६०
60

दय एव नाराशंसा यागत्वेन विधीयंते षष्ठी च संबंधवाचिनी
सर्वेषु च सत्रिणां प्रत्येकमेव कर्तृत्वमिति सिद्धं अतस्तत्र व
सिष्ठा वासिष्ठेः किं पन्नाराशंसो वसिष्ठेना पि तावत्क्रियत
एवं त्यविगुणस्तस्यात् तनूनपादन्ये: अतोयं कांचित्कल्प
मापित्याभिन्नकल्पा अप्यधिक्रियेरन् इत्येवं प्राप्ते आह एक
कल्पानामवैगुण्यात् एकः समानः तुल्यः कल्पः पक्षो ये
षां ते एककल्पाः तेषामेव समाहारो भवंति नाभिन्नकल्पानां
कुतः अवैगुण्यात् यदि सर्वेऽपि नाराशंसप्रयाजवंतः अथ
वा सर्वेऽपि तनूनपात्प्रयाजवंतः तदेवावैगुण्यं भवति तदावैगु
ण्याच्च फलसिद्धिर्भवति इतरथा भिन्नकल्पेषु सत्सु हि तेषि

प्र॰ प्रा॰
१

ष्वन्यतरप्रयाजाभावे सत्यन्येषां वैगुण्यात्फलं न सिध्येत्
न च वचनबलेन बाधः वचनस्य समानकल्पेषु चरितार्थत्वेन
बाधकत्वासंभवात् अत्र वासिष्ठादीनां यामिचेनोद्दिश्यमानत्वादये
न नराशंसादि विधीयते तादर्थ्यं च क्रतूपकारद्वारेणोपप
त्तिरिति नाभिन्नकल्पतापत्तिः वसिष्ठानामितरेषां मिलितानां अ षष्ठी
तो येषां स्वं नाराशंसः तेषामेव कर्मसिद्धिं करोति नेतरेषां अयमर्थः
वसिष्ठानां नाराशंस एव यत्र गतस्तत्र एव क्रतुः फलसिद्धौ पर्याप्तो भ
वतीति एवं तनूनपाद्युक्त एवेतरेषां अत एककल्पानामेव सहा
धिकारो नाभिन्नकल्पानामिति सिद्धं अत्र सत्रव्यतिरिक्तान्यप्यनेक
कर्तृकाणि सिद्धि यत्तमरायद्वादीन्युदाहरन्ति भवत्येव तुल्यन्याया
त् प्रदर्शनार्थं तु सत्रग्रहणानुवृत्तिः प्रदर्शिता अथावशेषः

का॰य॰स्॰ व्याख्या ६१

6

नासिष्ठो ब्रह्मेति वचनात् ब्रह्मत्वं वासिष्ठेन कर्तव्यं विश्वामित्रो होतेति वचनात् हो श्र॰ ध्यां॰ खं॰ १
त्रं विश्वामित्रेण तयोश्च भिन्नकल्पत्वान्न सहाधिकारसंभवः तस्मा
द्दर्शंगत्वभावाद्वासिष्ठब्राह्मणमाश्रित्य हौत्रस्य विश्वामित्रकर्तृकता
वाशित्वा वासिष्ठेन तत्समानकल्पेनैव वा केन चित्कर्तव्यं विश्वा
मित्रं वा हौत्रमंगीकृत्य ब्रह्मत्वमपि वासिष्ठकर्तृत्वबाधेन विश्वामि
त्रेण तत्समानकल्पेन वा केनचित्कर्तव्यं अथवा ब्राह्मणमात्र
स्याधिकार इति तत्राविशेषात्सर्वेषामधिकारः स्यात् अथ
वा वासिष्ठो ब्रह्मेति प्रकृतौ वचनात् ब्रह्मत्वस्याविकृतप्रायावश्यं
वासिष्ठेन भवितव्यं अतस्तत्समानकल्पानामधिकारः सिद्धां
तस्तु यत्त्वेकाश्चित्स्तोमभागानधीते स वासिष्ठ इति वचनात्
स्तोमभागाध्ययनवतोऽवासिष्ठस्यापि ब्रह्मत्वस्यानुज्ञानादवा

सिष्ठेनापि क्रियमाणं ब्रह्मत्वं विगुणं न भवति विश्वामित्रो होतेति वच
नात् हौत्रं विश्वामित्रेण विना विगुणं स्यात् तस्माद्विश्वामित्र
तत्समानकल्पानामेव सत्रेऽधिकारो नान्येषामिति सिद्धं अ
तो नैवन्यायेन तत्कल्पप्रमाणानामेव सत्राणि प्राप्नुवंति नान्ये न प्र
माणादिर्घिहस्वानां कृतः एवं हि श्रूयते यजमानेन संमितौ
दुम्बरी कार्येति यजमानेनौदुम्बरी सम्पदोच्छ्रितेन तत्समास्थितेन वा
विगुणस्यांगमित्येतित्त्र येन यजमानेन संमितोदुम्बरी नाक्रि
यते अपि तु तत्सदृशाद्वाध्वर्युणा येन संमिता नाक्रियते तस्य
विगुणं भवतीत्याशंक्याह न परार्थत्वात् कल्पप्रमाणा
नामेव सत्रेऽधिकारो भविष्यतीति यदाशंकितं तन्न कुतः परा

का०य०सू०
व्याख्या
६२

अ० ध्या०
१

6

र्थत्वात् परार्थो ह्यत्र यजमानः ऋत्विगादिमानार्थो गृह्यताभृतः अ
येनकेनचिद्यजमानेनसंमितासतीयजमानप्रमाणाभवत्येवेति
मित्रप्रमाणानामप्याधिकार इतिसिद्धं अतः शालाग्नेरवरेस्रुक्
यूपादिप्रमाणानियस्यकाचिद्यजमानस्यारत्न्यादिनाकार्याणि
नत्वेवमृत्विजामपि परार्थत्वाद्यस्यकस्यचिदग्निषु साधितं क
र्मसर्वेषां फलस्य साधकं भविष्यतीत्यनाहिताग्नीनामप्यत्राधि
कारः सत्रेषु भवतीति प्राप्ते उच्यते दर्शपूर्णमासाभ्यामिष्ट्वा सो
मेन यजेतेत्यस्य प्रवृत्तत्वात् तत्र प्राप्ते यज्ञेनानिष्ट्वेति वचनाद कृत।
दर्शपूर्णमासज्योतिष्टोमानामनाहिताग्नीनां नास्ति सत्रेष्वधि।
कारः तथाक्रतयोर्याधानगतादात्मनेपदादनाधानदृशां न

६२=

कार्यसिद्धौ पर्याप्नुवंतीत्यनाहिताग्नीनमनधिकारः आदधीतेत्य
त्मनेपदादग्न्याधानफलं स्वगामि भवितव्यं कर्मयोग्यताचाग्नी
नां तत्फलं अतोऽन्येनाहिताग्नयोऽन्यस्य कर्म न साधयंति यजमानेन
संमितौदुंबरीकायेति हि शास्त्रार्थो येनकेनचिदपि प्रयोगगतेन य
जमानेन संपाद्यत इति विषयं ननु तर्हि जुह्वादिपात्रेषु कथं नावि
किं यस्य कस्यचिद्यजमानस्य संबंधीनि सत्रे उपादेयानि आपयवा साधा
रणान्यन्यान्येवेति तत्राग्निवदात्मनेपदकृतविशेषाविरोधाभा
वात् यावद्यस्यकस्यापि पात्राण्युपादेयानीति प्राप्ते उच्यते सत्यं
अयं विरोधो नास्ति तथापि कश्चिदाहिताग्निमग्निभिर्दहंतीयत्र
पात्रैश्चेति तस्या दक्षिणे हस्ते जुहूमादधातीत्यादिवचनैः पात्राणां

का॰य॰सू॰ दाहकस्याभावः स्यादतः प्रतिपत्तिर्विधीयते तत्र यदि कस्यचित् यजमान प्र॰ध्या॰
व्याख्या स्याग्नेः सत्रमारभ्यते तदा मरणस्यानियतकालत्वात्कदाचित्सत्रयो १
६३ गमध्ये एव तस्य यजमानस्य मरणं स्यात् ततस्तस्य संस्कारः
63 पात्राणां च प्रतिपत्तिर्हीयते यदि कालेतैर्दह्यते प्रक्रान्तः प्रयोगो
विगुणः स्यात् तस्मात्साधारणानि पात्राण्युत्पाद्य सत्रं कार्यं
इदमिदानीं चिन्त्यते आर्त्विज्यविरोधेन क्षत्रियवैश्ययोः अन
धिकार उक्तः सत्रारम्भा ब्राह्मणानां स्यादिति कृष्णेनेरीति नाहि क्ष
त्रियवैश्ययोरधिकारो माऽस्तु गार्हपत्ये ऽधिकारो भविष्यति तत्र
आर्त्विज्यविरोधाभावादित्याशंक्याह वैश्यराजन्ययोर्गा
र्हपत्ये नेत्यनुवर्तते वैश्यराजन्ययोर्गार्हपत्येऽपि गार्हपत्येऽपि

अधिकारो न भवति अतः तयोर्ब्राह्मणसाम्यपक्षे भेदे नाभिन्नकल्पत्वात्
तन्नपात् नराशंसयाजिवत् तथाहि बार्हद्गिरं ब्राह्मणस्य त्र
ह्मणा जपन्ति पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति
तेन पार्थुरश्मं रायोवाजीयं चाक्षिपमाणो ब्राह्मणानां विगुणं
भवति बार्हद्गिरं चाक्षिपमाणो क्षत्रियवैश्ययोः तस्माद्वैश्य
क्षत्रिययोर्गार्हपत्येऽपि नाधिकारः इदमुच्यते पंचपंचा
शतस्त्रिवृतः संवत्सराः पंचपंचाशतः पंचदशाः पंचपंचाश
तः सप्तदशाः पंचपंचाशतमेकविंशाः विश्वसृजां सहस्रसंवत्स
रमिति अत्रायं संदेहः किमयं सहस्रसंवत्सरो ग्राह्यो मुख्य उ
त गौणः यदापि मुख्यस्तदापि किं मनुष्यव्यतिरिक्तानां उत

का॰य॰सू॰ व्याख्या ६४

67

प्र॰ध्या॰४ १

तः सहस्रायुषां गंधर्वादीनामधिकारः उत मनुष्याणामेव रसायन
मित्राविंदादिसंपादितसहस्रायुषां अथवा तुल्यकल्पः अथवा स
स्नानं अथवा विघ्नस्तजामयनं कुर्वतां सहस्रायुष्कं अथवा स्त्री
यशतानां यजमानानामधिकारः यदापि गौणत्वं तदापि किं मा
सेषु संवत्सरशब्दः उत द्वादशरात्रिषु तदा दिवसेष्विति पक्षाः तत्र
प्रथमं पक्षं तावदाह सहस्रसंवत्सरस्य मनुष्याणामसंभवात्
सहस्रसंवत्सरं सत्रं अमनुष्याणां मनुष्यव्यतिरिक्तानां स्वभावा
त्सहस्रायुषां सिद्धं गंधर्वादीनां भवति कुतः असंभवात् मनुष्या
णां सहस्रायुष्कस्यासंभवात् नहि सहस्रायुषो मनुष्याः सन्ति
अतः अतिबलादमनुष्याणां गंधर्वादीनामधिकारः स्यादे

तानित्यत्वात् अमनुष्याणामनधिकारस्य प्रागुक्तत्वाद्वसंते ब्राह्म
णोऽग्नीनादधीतेत्यादिविधानात् मनुष्याणामेवाहवनीयाद्यग्नयः
संतीनान्येषामितिनकथमपि गंधर्वादीनामधिकारः संभवति
अतो मनुष्याणामेव सहस्रसंवत्सरसत्रं स्यात् कात्स्न्येन यथो
दितं विधिमुपसंहर्तुं तेषामेव शक्तत्वात् नतु मनुष्याणां सहस्र
संवत्सरपरिमाणमायुः कथं संभवति उच्यते आयुःपरिमाणं म रायितायु
नुष्याणां स्यात् कुतः देहानित्यत्वात् देहस्यायुषोऽनित्यत्वात्
अनियतकालत्वात् नहि नियतकालं मनुष्यदेहावस्थानं क
श्चिच्छतं वर्षाणि जीवति कश्चिदधिकं काश्चित्कमस्मीति अतो
अपरिमितायुषो मनुष्या इति तस्मात् मनुष्याणामेवाधिकारः न

दधि४पं॰६

कथं

का.श्र.सू. व्याख्या ६५ नु मनुष्यदेहस्याविनाशेपि सहस्रायुष्ट्वं तेषां संभवतीत्याशंक्याह तस्य अ.ध्या.खं १
चकार्यत्वात् तस्य चायुषः कार्यत्वात् रसायनमित्रविंदादिनाक
र्तुं शक्यत्वात् श्रूयतेहि मित्रविंदया आयुःकामो यजेतेति अतो
रसायनैर्मित्रविंदादिभिरायुःप्रापकैः कर्मभिश्च मनुष्या अपि दीर्घ
मायुः प्राप्स्यंतीत्याशंक्याह नासंभवात् रसायनैरपि एतावत्परि
माणमायुर्न संभवति नच मित्रविंदादिकर्मभिरपि नह्येतावदा
युषो रसायनादीनां च संबंधो दृष्टपूर्वः नहि रसायनानामेताव
त्सामर्थ्यं दृष्टं यत् तैः सहस्रं वर्षाणि मनुष्या जीवेयुः सतानि
ह्यग्नेर्वर्द्धनानि वलीपलितनाशनानि स्वरवर्णप्रसाधकानि च
नैतावत्परिमाणस्यायुषो दातॄणीह श्रूयंते नच मनुष्याणा

मेतावदायुः कल्पयितुं शक्यते शतायुर्वै पुरुष इत्यर्थवादात् न
अस्येति नुष्ठानानि क्रायूर्वि [illegible] विग्रहः करिष्यते मैवं नहि द्विवचनबहु
वचनांतानां समास इष्यते प्रमाणाभावात् अभिधानासाम
र्थ्याच्च नन्वेवमेकत्वेपि प्रमाणाभावात्तेन कथं विग्रहः उच्यते
एकत्वं जात्यपेक्षं प्रातिपदिकाभिहिता जातिरेकेति यथा जाति
राश्रयमंतरेणानुपपाद्यमाना एकं तावदाश्रयमाक्षिपतीत्येकत्व
सिद्धिः तस्मान्मनुष्याणां रसायनैर्मित्रविंदादिभिश्च सहस्रं संव
त्सरायुष्ट्वस्य करणासंभवात्कथं मनुष्याणामधिकार इत्याश
ंक्याह शास्त्रसंभवादिति भारद्वाजः भारद्वाजो मुनिरित्याह
एवं ब्रवीति मनुष्याणामपि सहस्रायुष्ट्वं संभवति कुतः शास्त्रसं

भवात् शास्त्रात्संभवः शास्त्रसंभवः तस्मात् मित्रविंदाया आयुः
कामोयज्ञेनेतिहि शास्त्रंमित्रविंदयाऽऽयुर्भवयेदितिबोधयति
नचतत्रायुषःपरिमाणंश्रूयते येनकोचित्कर्मण्यभ्यासेनसह
स्रायुषोपिभविष्यंतीति रसायनान्यल्पस्यायुषःस्वभावस्यका
रकाणि दृश्यंते एवमभ्यस्यमानानि वीर्यवत्तमानि चास्थिर
शरीरतामुत्पादयिष्यंति शतायुर्वैपुरुषइत्यादि मितात्याधि
काधिकजीवनंमनुष्येषुप्रत्यक्षेणानुभूयतएवेति नात्यंतमकांत :
तस्मान्मनुष्याणामपिरसायनैर्मित्रविंदादिशास्त्रात्सहस्रं
संवत्सरविषयकशास्त्राच्चसहस्रायुष्कस्यसंभवोभविष्यती
तिप्राप्तेआह नादर्शनात् शास्त्रसंभवादितियदुक्तंतत्र न

हिमित्रविंदयासहस्रसंवत्सरपरिमाणमायुर्भवतीतिश्रूयतेना
प्यभ्यासेनतावत्कर्तुंशक्यते नापिरसायनैः कुतः अदर्श
नात् तावदायुष्काणांमनुष्याणामदर्शनात् यद्येभिरुपा
यैरेतावदायुर्भवेत् तर्हिकोप्युपायःसर्वैरपिदृश्यमानत्वादेतदु
पायसंपादितेनतावदायुषोमनुष्यादृश्येरन् नचदृश्यंते
अतएवमवगम्यते एभिरुपायैर्नतावदायुर्नभवतीति नाह्य
तावदायुःकस्यचिदपिसंभवति यत्ररसस्यतावदारोग्यपुष्ट्यादि
जनकत्वमेव नतावदायुर्हेतुत्वं आयुःप्रापको घामित्रविंदादिभिरप
रूपसाधनैरायुरेवाक्रियते नातिमात्रस्य वृद्धादधिकमायुः तथा
चामित्रविंदायज्ञकृत्यवाक्यशेषः विंदते मित्रं राष्ट्रमस्य भवति
अपपुनर्मृत्युंजयति सर्वमायुरेतीति नचापमृत्युनास्तीतिवा

ष्यं अपवर्गश्चाहिपमते एकशतमपमृत्यूनामिति नैनेकोमहाप्रवृ
त्तानुल्लंघनकेनाप्युपायेनकर्तुंन शक्यते तथामर्त्याः पितरःपुरा
ह्रुबोमित्रयन्तेमृत्योर्धिन्वन्तिपयआदृशः स्वर्विमृत्यूनामर
सांदर्शयति तथामनुरपिकालमर्त्यं ब्रवीति अत्रतमृत्यासे
नवेदनमध्यायस्यचलंघनात् कालस्यादत्तदोषाच्चमर
त्याविप्राजिघांसन्तीति अतोमनुष्याणामेकस्यापिसहस्र
पुरुषस्यासंभवावेकस्मिन्कालेसहस्रत्वनानापितृपुत्रपौ
त्रप्रपौत्रतत्पुत्रादीनांबहूनांसाधारणोस्यसहस्रायुष्ट्व
स्यासंभवात् कुलाधिकारइतिद्वितीयःपक्षोस्त्वित्याह कुलसत्र
मितिकाष्णाजिनिः काष्र्णाजिनिमुनिरित्याह एवंकथयतिय
कुलसत्रमेतत्सहस्रसंवत्सरंभवतिकुलस्यपितृपुत्रपौत्रप्रपौत्र

तत्पुत्रादिरूपस्यवंशस्यैतद्भवतिनत्वेकस्यकस्याचिदसंभवात्
मनुष्याधिकारश्चैतत् प्रारब्धंचावश्यंसमापनीयं नचैकःशा
क्नोतिसमापयितुमितियथाशक्यते तथासमापनीयमितिग
च्छमानेबहुवत्सरेशतुवर्तितेनतत्कुलीनाःकेचनकाश्चिदारब्धं
कोश्चिन्मध्येनुष्ठितंकेचित्समापयिष्यन्तीत्यवंकुलसत्रंकार्
ष्णाजिनिर्मन्यतेस्म नैतद्युक्तं यतः शास्त्रफलंप्रयोक्तरीति
न्यायात्समयानुष्ठातॄणामेकफलंभवति नैकदेशानुष्ठातॄ
णां नचापितृपुत्रादिष्वेकोपिकृत्स्नंकरोति तस्मान्नास्त्येवै
कस्यापिफलमिति अतोनकुलसत्रमेतत् २ नहिसामु
त्थानमस्तीतिचतुर्थः पक्षोस्त्वित्याह सामुत्थानामिति

लौगाक्षिः स्वामिशब्दो ह्रिशब्दस्यार्थे अर्द्धसमाप्तेसत्रे उत्थानं परित्या
गः स्वाम्युत्थानं स्वामित्यर्द्धे ऋध्नुवन्तीत्यपरः अर्द्धसमाप्तमेव इदं सत्र
मत्याज्यमित्यर्थः लौगाक्षिर्लिङ्गैरेवं मन्यते स्म कार्ष्णाजिन्य
पि मन्त्राकुलसत्रपक्षात् स्वाम्युत्थानं वरमिति तन्मते हि बहूनां
दृष्याभ्यासः अस्मन्मते त्वारम्भकर्तृहिंसास्वेति अस्य पक्षस्य
तदपेक्षयोः कृष्टता वस्तुतस्त्वयमपि पक्षो नुपपद्यत एव
असमाप्तात्कर्मणः फलानुत्पत्तेः नहि सत्रविधायकवचन
बलादेव सत्रिणां दीर्घायुर्भविष्यतीति मध्यमः पक्षोक्तमेवं
न ह्यस्य वचनस्य सोर्थः संभवति तद्वाचकपदाभावात् न
चकल्पयितुं शक्यते संभावितानुष्ठातृणामपि सत्रान्तरेष्वप्रवृत्त

त्तां देवान्निर्प्रय मारणानां तत्स्मत् बाधितत्वादनुष्ठेयत्वदर्शनात्
नहि पंचपंचाशत इत्यस्य उत्कर्षपरत्वे सत्रे गीकृत्य सार्द्धाधिक
त्रानां पुरुषाणामधिकारे भीहि तेसंवत्सर चक्रक्षये नसत्रस्यस
हस्रसंवत्सरत्वं संपद्यते यत्र एकोपि त्रिवृत्स्तोमक्रयागस्य
तेः संवत्सरः पंचपंचाशत्संख्यैर्यजमानैः प्रत्येकं कर्तुं
तेः स वक्ष्यमाणन्यायेन संख्यो भवति तथा पंचदशादयोपीति
नेकचक्रः संवत्सरात्मिदं सत्रम् हुण्तिनीये यजमानवद्धते : क्रि
यमाणास सहस्रसंवत्सरं भवतीति वक्ष्यः पक्षोक्तं सोप्यनुप
पन्नः चतुर्विंशतिपरमाः सत्रमासीरन्निति वचनादपि
कानां तत्राधिकाराभावात् तस्मात्संख्याशब्दः संवत्सरश

द्वयोर्मध्येऽन्यतरस्य गौणत्वमाश्रित्य मठव्यापिकारस्त्राश्रयणी
यः तत्रापि सर्वाराद्रस्य मुख्यत्वादेकार्थनिष्ठ्यसामर्थ्यान्न
तस्यार्थत्यागः संवत्सरपदं तु जघन्यत्वात् सावनसौरचान्द्र
मनक्षत्रात्मके कार्यसाधारणत्वेनार्थनिष्ठया सामर्थ्याद्गौणं भ
वति नहि यो मासः स संवत्सर इति वचनात्संवत्सरशब्दस्य मा
सपरत्वे सति सहस्रमासं पतनस्त्र मित्येव सन्नमः पत्त्वोक्तं सो
पिनोपपद्यते अतः अष्टमवर्षे उपनीतो द्वादशवर्षाणि वेदम
धीत्य विंशतिवयस्को विवाहं कृत्वा जातपुत्रोऽग्नीनादधी
त तस्मादाधानात्पूर्वं ज्योतिष्टोमानुष्ठानोत्तरकालमस्यायु
षि न संभवति सहस्रमासाः नहि संवत्सरशतानि मावेद्वादश

रात्रपरहति प्रयोगो द्वादशरात्रिषु संवत्सरशब्दः प्रतिमाविशे
षणां तत्र संवत्सरशब्दः न तस्य द्वादशरात्रिषु प्रयोगः तस्मा
दष्टमपक्षोऽपि अयुक्तः अपनमपक्षासिद्धान्तमाह अशक्यं वा
शक्यत्वात् वाशब्दोऽवधारणे अहःसु मेवित्ततत्सहस्रं प्रव्यं
नववर्षाणां न मासानां नापि द्वादशरात्रीणामिति कुतः
अशक्यत्वात् न ह्येतावत्तत्सत्रं मनुष्यैः कर्तुं शक्यते अ
पवाशक्यत्वात् अह्नां संवत्सरशब्देन प्रतिपादनं मनुर
ष्यैरपि कर्तुं शक्यत्वात् मुख्यार्थासंभवे च गौणार्थाश्रितिः शास्त्रा
यत्ते एव अनाप्यानर्थक्यापत्तेः न चात्र मुख्यार्थः संभव
तीति प्रागुक्तं अतोऽवश्यंभाविनि गौणपरत्वे दिवस

परत्वं युक्तं त्रिवृदादिशब्दानुपपत्तेराह त्रिवृत् पंचदशः सप्तदश इत्येते शब्दाः स्तोमवाचकाः संघः स्तोमस्तु कश्चित्कर्मविशेष इह नियागरूपेण लक्षणया वर्तते सर्वेषु तत्प्राविधप्रयोग वाक्यात् तन्त्वहः संघे क्वचिदपि त्रिवृदादिशब्दाः प्रयुक्ताः तैश्च शब्दैः समानाधिकरण्यात्संवत्सरशब्दः स्वावयव भूते हनि लक्षणया वर्तते त्रिवृतः संवत्सरा इत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तं भवति ननु संवत्सर शब्दस्याहनि वृत्तौ किं प्रमाणमित्यत आह प्रकृतिसामर्थ्यात् अहत्यापि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्येव श्रूयते हि त्रादित्यस्त्येव सर्वत्र तवोयादेवोदेत्यथ्यवसंतस्ततितिस

वर्तिसमवायाच्छुक्लत्वे दिवसः संवत्सरशब्देनाभिधानं अहर्वै संवत्सरस्य प्रतिकृतिः श्रूयते अतः प्रकृतिसामर्थ्यादितश्छतिबलात्संवत्सरशब्दोऽत्रा हरभिधायक इत्यर्थः तस्मादत्र सहस्रमेतदवसेयं किंच प्रकृत्यनुग्रहा च प्रकृतेर्गवामयनद्वादशाहादेरेवमनुग्रहः कृतो भवति प्रकृतौ हि अहान्येव संख्येयानि इहापि यद्यहान्येव गण्यानि भवन्ति तर्हि प्रकृतिरनुगृहीता भवति नान्यथा तस्मात्तहस्रादिनात्मक मित्र त्रिवृत्सहस्रामयनसंज्ञकं सत्रं मनुष्याणामेव भवतीति सिद्धांतः अथेदं विचार्यते एकप्रयोगवचनेचोदितानां एकफलानां संहत्यकारित्वं बहूनां कर्मणां सहस्रसांवत्सराणां संगात्युथानं कि तत्र नाभवतीत्युक्तमिति तत्रादौ पूर्वपक्षमसंहत्यकारित्वंप्राप्तं प्राप्यते

इत्यत्र पं·१·

प्र·धा·पं·९·
प्रथमपादप्रभृतिषु त्रिवृत्सहस्रसंवत्सरं
प्रोक्तसंवाचोपदेनसमिपस्थेनप्रकान्तीचाक्षरः

का॰ प॰ रू॰ आरव्या ॰७१

यद्यप्याग्नेयादयः षडपि परस्परानपेक्षाः स्वर्गं साधयेयुः तत्तत्ते प्र॰ ध्या॰ १
षां कामिनः कर्तव्यत्वेन युगपदुपस्थानाभावात् पृथगेव स्वयोग
युक्ताः कर्तव्या इतीतिकर्तव्यतासङ्कोचः तस्मात्संहत्यकारित्वं प्र
तिपाद्यते तत्र दर्शपूर्णमासादिष्वनेकप्रधानसंनिपाते संदेहो भ
वति किमाग्नेयादयः पृथक् पृथक् स्वर्गं साधयन्ति उत संह
त्येति तत्राग्नेयादीनि प्रधानानि परस्परानपेक्षाणि स्वोद्देना
मि पृथग्भूतान्युत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति तत्तत्संनि
धौ स्वर्गादिफलश्रूयमाणं भेदेनाकाङ्क्षितत्वात् द्वे देवे संबध्यते
तस्मात्प्रतिप्रधानं फलभेद इति प्राप्ते उच्यते पृथग्भूतानामप्येतेषां
मे[illegible]मेव फलं कुतः यतो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्य
क

नेन वाक्येन सर्वाश्रयेकेन दर्शपूर्णमासशब्देनोपादीयते
पाफलसंबन्धः कृतः अतः समुदितेभ्यः फलमिष्यते भेदे
न यथा ग्रामे राज्ञः कूपः खेयो ग्रामेण तडागः खेय इति ग्राम
शब्देन समुदायवचनेन संयुज्य विधायमानः कूपः समु
दितैः पुरुषैरेकैः खन्यते न तु प्रत्येकं कूपभेद एवमिहापि नात्र प्रति
यागप्रसिद्धिः प्रत्येकं फलं विधीयते स्वर्गैकयागं कुर्यादिति भावना:
साध्यसाध्यसाधनाश्रयोक्ता उत्पत्तिप्रयोगाभ्यां क्रमस्यामम
[illegible]ताः परस्परानपेक्षा एव वाक्यार्थतादृग्भावमेदेनापेक्षं
तेन दृष्टाद्भूसंनिधिसमाम्नातान्यङ्गानि तेषामेव तादृ
शानि युज्यन्ते विनियोगानुसारेणाक्रानुष्ठानं तस्मादेकेन

ना.य.स.
व्याख्या
७२

श्रीः

प्र.ध्या.
१

स्यांगयुक्तं कर्त्तव्यमित्येकं सांगं तु त्वापरमपि तत्पैव कर्त्तव्यं त
स्मात्प्रतिप्रधानं पृथगेवांगानुष्ठानं कार्यमित्ति प्राप्ते आह द्व
कर्मणांयुगपद्भावस्तत्र यत्र प्रधानकर्मणांयुगपद्भावः
सहप्रयोगः तत्रारादुपकारकाणामंगानां तन्त्रेण सकृद
नुष्ठानं भवति न प्रतिप्रधानं पृथक्पृथक् यदि सकृ
त्कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते यथा बहूनां
मध्ये कृतः कृतः प्रदीपः कृतस्तन्त्रमिति हेत्वाकांक्षायां
त्रीन्हेतूनाह प्रावण्यपुरः पार्थक्यकृतत्वैकाख्यसमवायप्रा
तिभ्यः प्रधानकर्मणां सहप्रयोगे सति यदंगानां सकृ
दनुष्ठानयुक्तं तत्कुतः प्राथम्यत्वात् सकृदप्यनुष्ठि

तेरादुपकारकैरंगैर्बहूनामुपकर्तुं सामर्थ्यस्य विशेषत्वात्प्रदीप
वत् यथा एक एव प्रदीपो बहूनां मध्ये कृतः सन् सर्वेषामुपकरो
ति एवमेतान्यपीति यद्यप्यंगानां प्रत्येकमेव विनियोगस्त
थापि विधिवदनुष्ठानं सकृदेवोपकारकं भवति यथैव हि ब्र
ह्मभावनारूपमेदेनैव कथंभावमपेक्षमाणायां चापि सकृदाम्ना
ना एवांगविधयः तस्मामपि प्रत्येकमंगानि समर्पयंस्तत्रापि
चकस्पैव तत्प्राधानोः मंत्रविधिसंनिधौ प्रकरणवशेन स
निधिर्बाध्यते तथैव बहूनां प्रधानानां फलस्य साधन
त्वात्कर्तृदेशकालैक्याद्युगपद्भावे त्वनुष्ठाने प्राप्ते
सकृत्कृतमेवांगं सर्वविषयात्कृतत्वात्तन्त्रमिति केचित्

का॰य॰सू॰
व्या॰ख्या
७३
73

विधिं बाधित्वा प्रकरणवशेन सर्वार्थं भवति किंच पौर्णमास्यां प्र॰ ध्या॰
पौर्णमास्यां यजेतेति त्रयाणां युगपदनुष्ठानं भवति तेषु यक्रमे १
ण्यागे ष्वनुष्ठीयमानेषु वाध्येते तस्मात्सकृदेवांगानुष्ठा
नं तथा प्रकृतकार्यं कृतत्वाच्छ्रूयते सकृदनुष्ठितेष्वंगेषु प्रकृ
तकार्यं कृत एव भवति प्रकृतकार्यं प्रकृतस्याभीष्टं फलं न
हि आग्नेयादिभिरंगोपकृतैः क्रियते आरादुपकारकाणि
चांगान्यनेकघटादि प्रकाशकप्रदीपवत्तेषां सहैवोप
कुर्वन्तीति सकृत्तानेनापि प्रकृतकार्यं कृतमेव भवति तथाच
कार्यसमवाय इति प्रांगानां तंत्रं भवति एकोर्थो यस्यासा
वेकार्थ एकफलोपः प्रधानानां समवायः संमूहः सए

कार्यसमवायः तत्र एकार्थैः समवाये एकफले प्रधानस
मूहे अंगानां तंत्र इति अंगानां सकृदनुष्ठानं श्रूयते तथा
हि नारिकावि ऽशतिरात्रयोवाघारौ पंचप्रयाजा द्वावाज्य द्वा
भागावाग्नेयः पुरोडाशस्तथाग्नीषोमी यउपांशुया
जोग्नीषोमीयः पुरोडाशोग्निः स्विष्टकृदिडा त्रयोनुया
जाः सूक्तवाकः शंयोवाकश्चाप्यपदेवः पत्नीसंयाजेष्वसं
ग्रहः हातिसामिष्टयजुश्चेति तत्राग्नेयोपांशुयाजाग्नी
षोमीयत्रयाणामेकफले प्रधानसमवायेप्याकृतीनामेक
विंशतिरव्याश्रूयते सर्वांगानां सहोपकारकत्वपक्षे एवोप
पद्यते नप्रतिप्रधानं पृथगनुष्ठानपक्षे तस्मात्प्रधानानां

सहस्रयोगेसकृदेवारादुपकारकाणां क्रिया संनिपत्योपकारकाणं
तु प्रतिप्रधानं आवृत्तिरितितु प्रागुक्तमेव अप्रधानानां सहप्र
योगेकारकाणाम्याह फलकर्मदेशकालद्रव्यदेवतागुणसामा
न्ये यत्रैकवाक्येन बहूनिप्रधानकर्माणि एकफलसाधनत्वे
न विधीयंते तत्रतेषामितरेतरसापेक्षाणां साधनत्वेन वि
धानात् ॥ ॥इति कात्यायनसूत्रव्याख्या प्रथमाऽध्याय
खंडीत समाप्तम् संवत् १९८८२ चैत्र शु० २८ शुभमस्तु ॥ छ
लि० पुरोहित मसाधुराम मुलाजम लिखारी मंदिर श्री रघुनाथजी
पुस्तकालय जंबूरवास ॥ छ ॥

इति कात्यायनीसूत्रव्याख्या प्रथमोऽध्यायः
खंडीत समाप्तम् ॥